
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

व्यु० वा०
१

॥ श्रीगणेशाय नमः ॥ शाब्दबोधे चैकपदार्थे ऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते। स च क्वचिद्भेदः क्वचिच्च तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः। अभेदश्च प्रातिपदिकार्थयोः समानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च नामपदेनोपस्थापितयोरेव संसर्गमर्यादया भासते। यथा घटो नीलः नीलघटमानयेत्यादौ घटादौ नीलाभेदः न तु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्। स्वसमानविभक्तिकत्वं च स्वप्रकृतिकसजातीयविभक्तिकत्वं। साजात्यं च विभक्तिविभाजकप्रथमात्वादिना। न तु समानानुपूर्वीकत्वं सामान्येन विंशत्यादेः अन्वयबोधानुपपत्तेः। न तु विंशत्याद्याः सदैकत्वे संख्याः। वेदाः प्रमाणमित्यादावन्वयबोधानुपपत्तेः।

विभक्तिर

एम
१

२ सर्गाः

3451

व्युत्पत्तिवाद अपूर्ण

संख्येयसंख्ययोरित्याद्यनुशासनात् शतं ब्राह्मणा इत्यादेः साधुत्वेपि वेदाः प्रमाणमित्यादयः कथं प्र
योगाः। विशेष्यविशेषणवाचकपदयोरसति विशेषानुशासने समानवचनत्वनियमात्। अन्यथा
घटा नील इत्यादेरपि साधुताप्रसंगात्। समानलिंगकस्थले तादृशनियमोपगमे वेदाः प्रमाणमित्यादेः
साधुत्वोपपादनेपि इति हेतुस्तदुर्वे इति कारिकाया इति चेत् समुदिता हेतुरिति काव्यप्रकाशव्याख्या
याः असंगतिर्दुर्वारैव। एवं समानलिंगकस्थले विशेष्यवाचकपदासमानवचनकस्यापि विशेषणस्य प्र
द्रस्य साधुत्वे तादृशस्थले औत्सर्गिकमेकवचनमेव सर्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति प्र
त्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपपत्तिर्नैवं। यत्र विशेष्यवाचकपदे

3

संख्याविरोधापेक्षाकृद्विशेषविषमत्वरूपविभक्त्यर्थः शाकल्यप्रसाधारणोऽननुगतइतितयोरुक्तम् ॥

व्यु० वा०
२

त्तरविभक्तिकतात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणवाचकपदयोः समान
वचनत्वनियमः। अत एव पुरूरवोमाद्रवसो विश्वेदेवा इत्यत्र द्वित्वविशिष्टयोः पुरूरवोमाद्रवसोर्वि
शेषणतयाविवक्षितत्वात् तद्वाचकपदस्य द्विवचनं तता वेदाः प्रमाणमित्यत्र च विशेषणवाचकपदो
त्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदक[illegible]प्रमितिकरणत्वेः त्वेति। शाब्द
प्रमाकरणत्वं च शाब्दत्वावच्छिन्नयावच्छक्तनिष्ठमेकमेवेति नायोग्यता। नच पदार्थः पदार्थेनान्वेति इति
व्युत्पत्तिविरोधः। संपन्नो व्रीहिरित्यनेकव्रीहितात्पर्यके वाक्ये एकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्या
वश्यकत्वात्। यद्वा जात्याश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थ एवैकत्वान्वयः। व्रीहित्वा

व्युत्पत्तिः कार्यकारणभावः स च किंचिद्धर्मिकप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धौ मुख्यविशेष्यतासंबन्धेन पदजन्योप
दार्थोपस्थितेर्हेतुः तेषां कारकः गौर्नित्या पशुः परश्च नित्यादौ नित्यत्वपशुत्वपरत्वयोः पदार्थतावच्छेदकेनान्वयापत्त्याहि ॥२॥ देवरपदवाच्यैक
स्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृ देवरौ इत्यत्र स्वामिनो भ्रातरो देवृदेवरपदवाच्या

पुरूरवोमाद्रवसोर्विशेषणतात्पर्यके स्य

व्यु०
२

द्विजातेः स्वरूपेण एव व्रीह्यादिपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेस्तत्र पदार्थान्तर।
स्यान्वयानुपपत्तेरिति मन्यते। तदा प्रकृते पीदृश्येव गतिः। यत्तु संपन्नो व्रीहिरित्यादावेकवचनोपस्थिता नि
नानैकत्वानिमित्यैवं नाना व्रीह्यादिघटीयं तेरस्तुत्वेव सामजस्ये जातावेकत्वभानोपगमो निरर्थक इति। न
दसत्। यतः स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेवैकवचना
र्थः नत्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्येनार्थतरत्वलाभात्। अनुपयोगाच्च। अत एव पशुना यजे
तेत्यादौ पशुनिष्ठतादृशैकत्वस्याविवक्षितत्वात् अनेकपशुकरणकयागात्रादृष्टसद्भिः। साजात्यं
चत्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृतस्य यैतावच्छेदकरूपेण। अतोऽत्र घटोऽस्तीत्यादौ घटनिष्ठ

नान्दपु. ५३१२

कु० वा०
३

भेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगिता नवच्छेदकैकत्वस्य तत्र बोधात्तस्य च प्रसिद्धत्वात्। एतद्देशे बहुघटसत्वदशायां तादृशवाक्यप्रयोग श्च जात्येकत्वादिना समर्थनीयः। यत्तु एकत्वाविवक्षायामपि भावाख्यातस्थले एकवचनस्य सा धुत्वदर्शनात् संख्याया अविवक्षायामपि सम्पन्नो व्रीहिरित्यादावेकवचनोपपत्तेः अलं जात्येकत्वपर तासमर्थनेनेति। तदप्यकिंचित्करं भावाख्यातस्थले गत्यंतरविरहेण विभक्तेर्निरर्थकत्वोपगमात्। अत्र सार्थकत्वसंभवे तत्परित्यागस्यानुचितत्वात्। सतिता सर्वत्र तद्बोधस्यानुभविकत्वाच्चेति। एवं च यः समुदितो हेतुरित्यत्र हेतुपदं कार्यतात्मप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं तथा स

×तादृशसमुदायत्वान्वितमेकत्वमेकवचनार्थः तृणारण्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वं
×अत एव १

एवः
२

कामिरा १४

तितेषामेकैकसमवधानदशायामपिकार्योत्पत्तेरेवंस्यक्तयानत्रितयपर्याप्तसमुदायस्यैवकार्योत्पत्तिप्र
योजकतानवच्छेदकतयातेषांत्रयाणांनतथाविधैकसमुदायत्वाश्रयत्वानुपपत्तिः। एवंजास्माकं
तिव्यन्वयः पदार्थइत्यत्रत्रितयनिष्ठस्यपदशक्तिरूपस्यपदार्थत्वस्यैकत्वंविवक्षितमितितत्रविशेष्यपदस्य
बहुवचनान्तत्वेपिविशेषणपदस्यैकवचनान्तत्वा। प्रत्यक्षानुमानोपमानशाब्दाः प्रमाणानि इत्य
त्रैकवचनार्थस्यैकत्वस्यान्वयानुपपत्त्याविशेषणपदस्यानेकवचनान्ततेति। एवंपितरोदेवताइ
त्यत्रापिपितृपितामहादीनांसहितानामेकरूपैकदेवतात्वविरहेणपितृत्वपितामहत्वादिनाप्रत्ये
केवयागोद्देश्यत्वरूपदेवतात्वात् उद्देश्यतावच्छेदकभेदेनचउद्देश्यताभेदात्तत्रैकत्वस्याविवक्षया।

व्यु० पा०
८

देवतापदस्य बहुवचनांतत्वेनातिरिक्त। स्वमहतिकत्वं च स्वाव्यवहितोत्तरत्वेन प्रतिसंधीयमानत्वं। तेनेद
धिसुंदरं इत्यादौ विशेष्यपदानंतरं विभक्तेरसत्वेपि न क्षतिः। तत्र विभक्त्यनुसंधानं विना शाब्दबोधा
नुपगमात्। एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्वत्वप्रा
प्रतिसंधीयमानत्वं। तेनेदं दधीत्यादौ विशेषणपदानंतरं विभक्तेरसत्वेपि न क्षतिः। अथ नील
स्य घट इत्यादावपि परार्थोपस्थित्यादिकारणसमवधानसंभवात्कथं न नीलघटादेरभेदान्व
यबोध इति चेन्न। तथाविधान्वयबोधोपयिकाकांक्षाविरहात्। तथाहि तादृशान्वयबोधे प्रथ
माविभक्त्याद्यंतघटादिपदसमभिव्याहृतप्रथमाविभक्त्याद्यंतनीलादिपदत्वमेवासमस्तनीलपदघ

व्यु०
८

टपदाघेराकांक्षा। समासस्थलेच घटपदाव्यवहितपूर्ववृत्तिनीलादिपदत्वे नीलादिपदाव्यवहितोत्त
रत्वेति घटादिपदत्वंवा आकांक्षा। उक्तस्थलेचैतादृश्या एकस्या अप्याकांक्षाया विरहान्नानुपपत्तिः।
कायितावच्छेदककोटौ चाव्यवहितोत्तरत्व निवेशान्नाकांक्षाज्ञानयोः परस्परंव्यभिचारः। यत्तुसमा
सव्यासमाधारणं विशेषणवाचकपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपं विक
दुविभक्तिराहित्यमेव तादृशान्वयबोधोपयिकाकांक्षा। विशेष्यवाचकंदनिष्ठविशेषणवाचकपद
प्रकृतिकविभक्त्यप्रकृतित्वंतु न तथा नीलघटमानयेत्यादावसंभवात्। तदसत्। विशेष्यवाचक
पदाप्रकृतिकत्वस्य तादृशपदानुत्तरत्वरूपस्य तदुत्तरत्वेनाप्रतिसंधीयमानत्वरूपस्य वा नीलोघट।

मु० वा०
५

इत्यादौ नीलादिपदसमभिव्याहृतविभक्तेर्घटादिपदसमभिव्याहृतविभक्तिभिन्नतयानन्वयसत्वात्। अ
पविशेष्यवाचकपदोत्तरवृत्तिविभक्तिविभाजकधर्मवद्विभक्तिराहित्यस्य विवक्षणे तत्र दोष इति चेन्न
द्विवि[illegible] भक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञानासंभवात् शाब्दबोधानुप
पत्तेः॥ नीलो घट इत्यादावपि सुपदस्याम्पदत्वभ्रमदशायां तादृशशाब्दबोधस्यानुदयात्। नील
स्य घट इत्यादावपि षष्ठ्यादेः सुपदत्वादिभ्रमदशायां शाब्दबोधोत्पत्त्या स्वरूपसतो विरुद्धविभ
क्तिराहित्यस्याप्रयोजकत्वात्. अथ नीलो घटः नीलघटः इत्यादिद्विविधसाधारणं स्वोत्तरसुप्
द्भिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वाव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्त्वाद्युक्तं घ

मुमः
५

दीदिपदत्वमेवतथास्त्विति चेन्न। नीलघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनास्मादृश्या आकां
क्षायाः समासस्थलेउपगंतव्यतयाउपदर्शित समासव्यासधारण्यानुगताकांक्षानुसरणस्या
प्रयोजकत्वात् अथ नीलं घट मानयेत्यादेनीलादेर्घटादावन्वयस्योपगमे नीलादिपदोत्तरवि
भक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेन्न कुत्रापि। विभक्तिः पदसाधुत्वार्थमेव प्रयुज्यते। अभेदस्यैव वि
शेषण विभक्तेरर्थः अभेदस्य संसर्गतयाभानं तु समासस्थल एव। तत्र विभक्त्यनुसंधानं विनापि
शाब्दबुद्धेरनुभविकत्वादित्यपि वदन्ति। अथ एतन्मते [illegible] अभेदो यदि भेदत्वावच्छिन्नाभाव
स्तदा ऽप्रसिद्धिः यदि च भेदप्रतियोगिकोऽभावस्तदा नीलं जलमित्यादिवाक्यस्य प्रामाण्यापत्तिः।

मु०प० ६

जलेद्धित्वादिनानीलभेदाभावसत्वात्। नीलभेदत्वावच्छिन्नाभावस्यविभक्त्यर्थत्वे नीलादिपदार्थानन्वय
प्रसंगः [illegible] नचभेदप्रतियोगिकोऽभावो विभक्त्यर्थः नीलपदसमभिव्याहारान्नील
भेदत्वावच्छिन्नाभावः प्रतीयत इति वाच्यं। पदार्थद्वयसंसर्गभानस्यैवाकांक्षानियम्यत्वात्। नीलभे
दत्वावच्छिन्नप्रतियोगिताकत्वांतर्भावेन च वृत्तिं विनाभेदत्वैरूप्यपदार्थेनावच्छेदकस्याभावे तादृशासं
बंधभानासंभवात्। मैवं। भेदोऽभावश्चविशेष्यत्वविभक्तेरर्थः। विशिष्टलाभस्त्वाकांक्षादिवशात्।
एतेन भेदे नीलादिपदार्थान्वये एकदेशान्वयप्रसंग इत्यपि निरस्तं। नचविशेष्यत्वविभक्तेर्भेदार्थ
कत्वे नीलं घट इत्यादावप्यभेदान्वयबोधापत्तिः धात्वेन धनवानित्यादौ तृतीयया अभेदबोधने नाभे

एम० ६

दभकारकबोधे वि[illegible]रुद्धविभक्तिरादिस्थाने प्रथमादिति वाच्यं। द्वितीयादिनाऽभेदबोधने द्वितीया
द्यंतविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वाभ्युपगमात्‌ अथ प्रमेयो घट इत्यादौ प्रमेयत्वा
वच्छिन्नभेदाप्रसिद्ध्या लघुधर्मसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे कंबुग्रीवादिमा
न्‌ घट इत्यादावपि कंबुग्रीवादिमत्त्वावच्छिन्नभेदाप्रसिद्ध्या विशेषणविभक्तेरभेदार्थकत्वासंभवः॥
एवं नीलघटादिपरनीलादिपदघटितस्य नीलो घट इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः नीलत्वादि
नाघटादेर्भेदाभावस्य नीलघटादौ सत्त्वात्‌। एतेन विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिक
मेव विशेषणविभक्तेरर्थः नीलत्वादेर्नीलत्वाद्यवच्छिन्नभेदाभावरूपतया भेदार्थकत्वप्रवादोपपत्ति।

१० रित्यपि निरस्तं। नीलत्वादौ नीलत्वादिमतः स्ववृत्तित्वसंबंधेनान्वये आकांक्षाविरहाच्च। यथाहि। त।
द्विशिष्टे तदधिकरणत्वयोरनुभवविरुद्धस्तथा तद्धर्मे आधेयतया तद्धर्मवदन्वयितौपि। अतएव यो॰
कर्मेगच्छतीत्यादिवाक्यस्य निराकांक्षता। न चैवं संसर्गतामतेप्यनिस्तारः। नीलो घट इत्यादौ
स्ववृत्तिनीलत्वादेः संसर्गतास्वीकारे उक्तस्थले प्रामाण्यापत्तेर्दुर्वारत्वात् इति वाच्यं। स्ववृत्तिनील
त्वादेः स्वस्मिन्नेव संबंधतोपगमेन घटादिवृत्तिनीलत्वादेः घटादेश्च घटादिसंबंधताविरहेण ता।
दृश्यापत्तिप्रसंगाभावात्। वस्तुतस्तु नघुक्तित्वावच्छिन्नभेदाभाव एव नीलत्वादिप्रकारेण। एषः
भासमानानां तत्तद्व्यक्तीनां स्वस्मिन् संबंधतया भासत इति न काप्यनुपपत्तिः संबंधताचेत

स्यभेदप्रतियोगिकाभावेन तत्तद्व्यक्तिभेदप्रतियोगिकाभाववत्वेन वैलक्षण्यादेतत् । नचैवं विशेषण
विभक्तेरभेदार्थकत्वमतेपि न तत्तद्व्यक्तित्वावच्छिन्नभेदाभाव एव विभक्त्यर्थो वक्तव्य इति वाच्यं ॥
तथा सत्यपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य कथंचिदपि ज्ञातासंभवेन तदवच्छिन्नभेदाभावे शक्तिग्र
हासंभवेनापूर्वव्यक्तौ नामभेदान्वयबोधानुपपत्तिः । संसर्गज्ञानस्य विशिष्टबुद्धावहेतुत्वेना
नुपस्थितस्यापि संसर्गतामतेऽनुपपत्त्यभावात् । नच विभक्त्यर्थेपि भेदे तत्तद्व्यक्तित्वावच्छिन्न
प्रतियोगिताकत्वसंबंधेनैव नीलत्वादिना तत्तद्व्यक्तौ नामपदवयः तादृशभेदानामपि तत्तद्व्यक्ति
भेदतावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावेऽन्वयउपपद्यते तावतैव तत्तद्व्यक्तित्वावच्छिन्ना

१०

भेदलाभ इति न काचिदनुपपत्तिरिति वाच्यं । विशेषणतावच्छेदकावच्छिन्ना याः स्वप्रतियोगिताया
अभावे संबंधतया भानात् । अन्यथा विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेः । प्रतियोगिविशिष्टाभा
वभाने तु विशिष्टवैशिष्ट्यमर्यादां नातिशेते इति दर्शने न केवलं विशेष्ये विशेषणमिति रीत्या
न कश्चिदभ्युपैतीति चेत् । सत्यं । अभेदस्तादात्म्यं । तच्च स्ववृत्ति साधारणो धर्मो असाधारणश्च
चैककवृत्तित्वं । तच्च स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टयत्त
द्व्यत्वं त्वेकमात्रवृत्तिधर्म एव विशेषणविभक्तेरर्थः । वृत्तिश्च तत्र महत्त्वस्य संसर्गमर्याद
या भासते नातादृशधर्मस्तत्र घ्राक्तित्वा । दिक् । अपूर्वव्यक्तिनिष्ठतादृशधर्मस्य विशिष्ट्यत्वानु

ष्ट्र

रामः

प्रशाक्यत्वेपिएकमात्रवृत्तित्वादिनासामान्यमत्यासत्यासुग्रहत्वमेव। अभेदस्यसंसर्गतामतेप्येता
दृशानुगताभेदस्यैवतथात्वमुचितं। तन्नतद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्यविशिष्यनथात्वे
घटोननीलइत्यादिवाक्यजन्यबोधेप्रतियोग्यभावान्वयोतुल्ययोगक्षेमावितिन्यायेनतादृशा
ननुगतसम्बंधावच्छिन्नप्रतियोगिताकाननुगताभावाएवभासेरन् ननुनीलादि[illegible]कोप्या [निष्ठ]
यः तथासतियत्किंचित्तादृशाभाववतापर्येणप्रयुक्तस्यनीलोपिननीलइतिवाक्यस्यप्रामाण्यं।
स्यात् इष्टंतुबोध्यं। विशेषणविभक्तेरभेदार्थकत्वेघटोननीलइत्यादौनञानीलाद्यभेदाभावए
वप्रत्याय्यिष्यते ननुनीलादिभेदः यादृशसमभिव्याहारस्थलेयेनसंबंधेनयत्रधर्मिणिक्रियेन

मु०बा०
१८

रूपेणयद्रूपत्वेननञ्सत्त्वेप्रतीयतेतादृशस्थलेनञातत्रधर्मिणितादृशसंबंधावच्छिन्नतादृशध
र्मावच्छिन्नप्रतियोगिताकाभावबोधस्यव्युत्पत्तिसिद्धत्वात्। प्रतियोग्यभावान्वयित्वादेरप्य
यमेवार्थः एवंचनञोभेदबोधकत्वंकुत्रापिनसंभवति। अनीलघटमानयेत्यादौघटपदसा
मानाधिकरण्यानुरोधेननीलपदस्यनीलभिन्नपरतयानञोभेदवत्त्वेवलक्षणयाउपग
न्तव्यत्वात्। इदंत्वत्रावधेयं। अभेदस्यप्रकारतामतेपिघटोननीलइतिवाक्यस्यनीलाभेदाभा
वबोधकत्वेपितत्तीयाभावस्यप्रतियोगित्वरूपतयानञोभेदबोधकत्वंनानुपपन्नं। परंतुभेद
त्वप्रकारेणबोधोभवतिनवेत्यन्यदेतत्। इदंतुतत्त्वं। असमासस्थलेभेदस्यसंसर्गतोपगमेऽ

रामः
१८

धिगौरवमिराहाराम्न विशेषणविभक्तेर्वृत्तिकल्पनमनुचितं। मचाभेदे यत्र विशेषणविभक्तेः शक्ति
ग्रहः। [illegible] स्वारसिकलक्षणाग्रहो वा तत्र सर्वमत एवाभेदप्रकारबोधस्य नीलो घटः इत्यादि
वाक्यादुत्पत्तात्तादृशसमभिव्याहारज्ञानस्य द्विविधबोधे हेतुताद्वयं कल्पनीयं अभेदस्य संस
र्गतावादिनेति गौरवं। एवं तादृशसमभिव्याहारज्ञानघटितसामग्र्याभिन्नभिन्नयोग्यताज्ञान
घटिततया द्वैविध्येन मित्या विषयकप्रत्यक्षादिकं प्रति तादृशशाब्दसामग्रीप्रतिबंधकतापि।
अप्याधिक्यमिति वाच्यम्। अभेदस्य संसर्गतावादिनाऽप्युक्तस्थलेऽपि तत्संसर्गकबोधस्यैवोपग
मादिति दिक्। स्तोकं पचति मृदु पचतीत्यादौ विरुद्धविभक्त्यवरुद्धपदोपस्थापितस्यापि स्तोकम

कु०वा०
१०

द्वादेर्धात्वर्थपाकादावभेदान्वयोऽनुत्पत्तिसिद्धः तदनुरोधेन च द्वितीयान्तपदधात्वर्थयोः समभि
आहारस्याप्यभेदान्वयबोधौपयिकाकांक्षात्वमुपगम्यते। क्रियाविशेषणस्थले च न द्वितीया
यातिरिक्तविभक्तिरुत्पद्यते। क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात्
। नचैवं स्तोकं पाक इत्यादावपि द्वितीयाप्रसंगस्तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वा
द् भावकृतो प्रयोगसाधुत्वमात्रार्थकतया धातुनेव च तत्र पाकादिप्रतिपादनात् इति वाच्यं ॥ एवं
क्रियापदस्य तत्र सार्थकप्रत्ययान्तधातूपस्थाप्यार्थपरत्वात्। लोके स्वीयते इत्यादावाख्या त्रि० १ १०
तस्यापि वर्तमानत्वाद्यर्थकतया सार्थकत्वात्। न च वर्तमानत्वाद्यविवक्षायां द्वितीयानुपपत्ति

तिवाच्यं। वर्तमानत्वादि विवक्षास्थले इव अर्थबोधप्रयोजनकाकांक्षाशालित्वेनैव तद्विवक्षा प्र
लेऽपि भावाख्यातस्यार्थवत्वात्। केचित्तु धातोरिव घञन्तस्यापि पाकादौ शक्तिरुपेयते। अन्य
था: सुप्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावनन्वयानुपपत्तेः प्रकृत्यर्थाविनस्यार्थबो
धकत्वं प्रत्ययानामिति व्युत्पत्तेः। धातूनां च सुब्विभक्त्यप्रकृतित्वात्। प्रकृत्येकदेशार्थेऽपि प्रस
पार्थान्वयोपगमे [illegible] पचते पश्यतीत्यादितः पचमाने पश्यतीत्यादितश्च पाकादौ द्विती
यार्थकर्मत्वान्वयप्रसंगात्। एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयस्याव्यु
त्पन्नतया तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्मत्वविशेषणतया अन्वय इति चेत् तथापि पा।

कादिविशेषणतयास्तु वर्थे तेष्वामन्वयसंभवात्। यत्र पाककर्त्रादेर्दुत्वादिके बाधिते पाकादेश्च त
दबाधितं तत्र पचन्तो पश्यति पचमानो पश्यतीत्यादिप्रयोगप्रसंगस्य दुर्वारत्वात्। धातूपस्था।
प्यार्थे सुवर्थावयवबोधं प्रति नञ्द्युत्पन्नप्रत्ययधर्मिक किंचिदर्थपरत्वज्ञानस्य प्रतिबंधकत्वमुप
गम्यते तादृशातिप्रसंगवारणे च गौरवात्। एवं शोभनं पचनमित्यादौ धातुमात्रेण पाकाद्युप
।स्थितौ तत्र शोभनाद्यभेदान्वयबोधानुपपत्तिः विशेषणविभक्तिसजातीयविभक्तिप्रकृत्यनु
पस्थाप्यत्वात् प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे नञर्थस्तु डादे
रधिकरणपरत्वेपि तथाविधान्वयबोधापत्तेः। कस्यचित्प्रतिबंधकतावकल्पयित्वात द्वारणे

वा०
२

वपु०
२२

चयोरर्थवत्। यद्येवमुपकुंभमर्द्धपिप्पल्यादिरूप पूर्वपदार्थप्रधानसमस्तपदात् कुंभसमीपपिप्प
ल्यर्द्धादौ विभक्त्यर्थान्वयस्य प्रातिपदिकान्तरार्थान्वयस्य चानुपपत्तिः पूर्वपदस्य समासोत्त
र विभक्त्यप्रकृतित्वादिति वाच्यं। एतदनुरोधेनैव कुंभपिप्पल्यादिपदानां कुंभसमीपपिप्पल्यर्द्धा
दौ लक्षणायाः पूर्वपदस्य तात्पर्यग्राहकमात्रोपयोगित्वस्य च स्वीकारात्। वस्तुतस्तु तत्र तत्र
उत्तरपदार्थविशेषिते पूर्वपदार्थसमीपार्द्धादौ प्रत्ययार्थान्वयबोधेन तादृशसमस्तपदप्र
त्ययपदयोरव्यवहितपूर्वापरीभावोऽप्याकांक्षा। एवं तत्र प्रातिपदिकान्तरार्थाभेदान्वयबोधे
समानविभक्तिकयोस्तादृशसमस्तपदपदान्तरयोः समभिव्याहारोऽप्याकांक्षा। तथा सत्य

पोः

पा०
२

१५

तिप्रसंगविरहात्। एवंधात्वर्थे पाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिकांतरार्थाभेदान्वयबोधे च लु
ड्. आद्यंतसमुदायप्रत्ययपयोरानुपूर्वीरूपाव्यवहितपूर्वापरीभावस्य। समानविभक्तिकपोस्ता
दृशसमुदायपदांतरयोः समभिव्याहारस्य चाकांक्षात्वोपगमे तु दर्शिताधिकरणार्थकल्युट्प्र
त्ययस्थलीयातिप्रसंगस्य दुरुद्धरत्वापाननत्वं संभवः। अथ घञाद्यंतसमुदायस्य सार्थकत्वे। प्र
आद्यंतसमुदायस्य संयोगविभागत्वादिविशिष्टवाचकत्वे व्युत्पाद्य संयोगविभागादिपदानां नै
मित्तिकसंज्ञात्वनिराकरणे रूपग्रंथे दीधितिकृता विरुध्येते चेन्न काक्षतिः नहि कस्य विदुग्रं
यकृतो लेखने। युक्तिबलादृष्टकसिद्धे। बाधकं। एवं च यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं।

रा.प्र:
१२

नचतद्विशेषणवाचकपदाद्वितीयैवयत्रतुह्लदंतसमुदायस्यपाकादौतात्पर्यंतत्रतादृशपदं
ह्लंतेनसमुदायसमानविभक्तिकमेवनतुक्तं। कांतेत्रपरिशिष्टह्लंता कर्मस्तोकपाकः ह्लदंतवि
शेषणत्वात्। धात्वेकाधिकरण्येतुस्तोकमोदनस्यपाकइतिस्यादेवेतिवदंति। तदर्थबोधकप
दोत्तरविभक्त्यासंख्याबोधने अभेदसंसर्गावच्छिन्नप्रकारताभिन्नतदर्थविषयताशालिशा
ब्दबोधसामग्रीअपेक्षिता। तादृशश्चबोधस्तदर्थविशेष्यकः तदर्थनिरूपितभेदान्वयविष
यकश्च। नीलोघटाइत्यादौचविशेष्यवाचकपदोत्तरविभक्त्यैवद्वित्वादिकंभास्यते। एवंच
क्रियाविशेषणवाचकपदोत्तरविभक्त्या अबाधितयोरपिद्वित्वबहुत्वयोः प्रत्यायनासंभवात्

वा०
१३

ख्यै

।तादृशपदोत्तरमौत्सर्गिकमेकवचनमेव भावाख्यातस्थलवदित्यवधेयं। अभेदान्वयबोधश्च विभ
क्तोपस्थितयोरेवेति व्युत्पत्तिः घटो घटः दण्डवान्दण्डवान् पाकेपवतीत्यादौ घटत्वदण्डत्वपाकत्वाद्यव
च्छिन्नस्य तथात्वबोधानुदयात्। अथ नत्वयोजकसमानविभक्तिकत्वादेः सत्वात्कथं न तादृशा
न्वयबोधः। अत्राहुः यादृशफलोपहितत्वं सिध्यति तादृशस्यैवापत्तिः संभवति। लक्षसमग्रीव
लात्। यादृशं च सर्वथैवाप्रसिद्धं तादृशस्यापादकाप्रसिद्ध्यापत्तिरशक्यैवेति। घटत्वाद्यवच्छि
न्नविशेष्यताकाभेदसंसर्गकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधस्य क्वचिदप्यनुदयात्।
कथं तदापत्तिः॥ घटो नीलघटः दण्डवान्रक्तदण्डवानित्यादौ तादृशशाब्दबोधस्य प्रसिद्धेः॥

ए प्रः
१३

विधेयकोटावधिकावगाहिनःशाब्दबोधस्यनवीनैरुपगमादितिचेत्।तर्हिघटेघटोविशेष्यताव
च्छेदकविषयतानीलादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञानविरहादिघटितैवसामग्री
घटत्वाद्यवच्छिन्नविशेष्यकनीलघटत्वाद्यवच्छिन्नाभेदान्वयबोधप्रयोजिकातस्याश्चप्रकृते
ऽभावात्। घटोघटइत्यादौनतादृशशाब्दबोधापत्तिरिति अथस्वत्वादौधर्मितावच्छेदक
तासंबंधेनप्रसिद्धस्यघटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्यघटत्वादावापत्तेःसंभवा
त्। नचतत्रापादकाभावः तात्पर्यज्ञानविरहादिघटितायाधर्मितावच्छेदकतापूर्याद्व्यस्वा।
दैवतदुत्पादनियामकसामग्र्याएवापादकत्वात्। नचधर्मितावच्छेदकतासंबंधेनद्रव्यो।

तादेतादृशान्वयबोधोत्पत्तिप्रयोजिकाद्यपदजन्यघटत्वाद्युपस्थितिः तदवच्छिन्नविशेष्य
कयोग्यताज्ञानादिघटितसामग्र्येव। धर्मितावच्छेदकतायाः तत्कार्यतावच्छेदकसंबंधतापि
रदेपि द्रव्यत्वादिनिष्ठायास्तस्यास्तत्कार्यतावच्छेदकधर्मघटकत्वात्। तस्याश्चात्र निष्ठप्र
स्यासत्वाद्यात्वावच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नाभेदबुद्धित्वरूपस्वीयकार्यतावच्छे
दकावच्छिन्नोत्पत्तेरेवव्याप्यतया घटत्वादेर्धर्मितावच्छेदकतासंबंधेन घटत्वावच्छिन्ना
भेदबोधापादकत्वेन संभवतीति वाच्यं। योग्यताज्ञानस्य धर्मितावच्छेदकं निवेश्यतद्भेदेना
नेन कारणताकल्पनमपेक्ष्य लाघवाद्धर्मितावच्छेदकतासंबंधेन शाब्दबुद्धौ तादृशसंबंधेन त।

सम
१७

स्वधर्मितावच्छेदकमनिवेश्य हेतुताकल्पनस्यैवोचितत्वात्। घटत्वादिधर्मितावच्छेदककघट
त्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानबलादेव घटत्वादेर्धर्मितावच्छेदकतासंबंधेन तदापत्तेः।
नच योग्यताज्ञानस्य धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या हेतुत्वोपगमे द्रव्यत्वावच्छिन्नस्य परा
नुपस्थितत्वेपि द्रव्यत्वादेस्तादृशप्रत्यासत्त्या योग्यताज्ञानात्तत्र तादृशप्रत्यासत्त्या शाब्दबोधाप
त्तिः। आत्मनिष्ठप्रत्यासत्त्या हेतुत्वे तु द्रव्यत्वावच्छिन्नोपस्थितिमन्तरेणापि तादृशप्रमेयत्वाव
च्छिन्नोपस्थित्यादिदशायां प्रमेयत्वादेर्धर्मितावच्छेदकतासंबंधेन योग्यताज्ञानस्य फलज
नकत्वात्तादृशद्रव्यत्वाद्यवच्छिन्नोपस्थितिविरहस्याकिंचित्करत्वादिति वाच्यं। समानप्रकारता

६६२

मु० १०
१

मस्यासत्यापदार्थोपस्थितेः शाब्दबोधहेतुत्वोपगमात्। येन संबंधेन यद्धर्मावच्छिन्ने कार्य्यं प्रति येन सं
बंधेन यद्धर्मावच्छिन्नं कार्यस्य व्यापकता तेन तेन संबंधेन तद्धर्मावच्छिन्नकार्यघटितसामग्र्या अ।
पितेन संबंधेन तद्धर्मावच्छिन्नकार्योत्पत्तावपेक्षितत्वात् प्रकारतासंबंधेन द्रव्यत्वादिपदज्ञस
पदार्थोपस्थितिसत्त्वेन तत्र धर्मितावच्छेदकतासंबंधेन शाब्दबुद्ध्यापत्तेरयोगात्। न च यत्र प्र
मेयत्वाद्यवच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्यवच्छिन्नविषयकोपस्थितावेवोद्बोध
कालान्तरात् द्रव्यत्वावच्छिन्नस्मरणेनं तत्र द्रव्यत्वावच्छिन्नविषयकशाब्दबोधापत्तिवारणाय यद्ध
र्मावच्छिन्नविशेष्यकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारको।

गुमः
१२

तथाच प्रकारविशेषनिवेशस्यावश्यकत्वे विषयनिष्ठ
प्रस्थितित्वेनैव पदार्थोपस्थितेर्हेतुता वाच्या। तथाच प्रकारविशेषनिवेशस्यावश्यकत्वे विषयनिष्ठ
प्रत्यासत्तेर्हेतुताकल्पनमयुक्तं तथासति पुरुषभेदेन कार्यकारणभाववाकुल्यप्रसंगादिति वाच्यं। स्व
जनकत्वानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकता विशिष्टप्रकारतासंबंधेन पदार्थोपस्थितेर्हेतुतास्वीकारेण ताद्दशापत्तेर्वारणात्। नचापदार्थेपि प्रकारतासंबंधेन शाब्दबोधजनकस्य
दार्थोपस्थितेर्हेतुतास्वीकारेण तादृशापत्तेर्वारणात्। प्रकारनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वे
घटेतत्र प्रकारतासंबंधेन पदार्थोपस्थितेरभावात्। प्रकारनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वे तादृशव्यभिचार
ताव्यभिचारेण कल्पयितुमशक्येति वाच्यं। परामर्शकारणताविचारे दर्शितैतादृशव्यभिचार
स्यवारणीयत्वादिति चेत्। तर्हि तद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यता

31

मु०वा०
१६

वच्छेदकतासंसर्गेण शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्यापि हेतुतायाः स्वीकरणीयतया न।
घटो घट इत्यादिस्थले शाब्दबोधोपत्तिः। स घट इत्यादिवाक्याज्जातित्वादिना घटत्वादिधर्मिताव।
च्छेदककस्य जातित्वादिविशिष्टघटत्वाद्यवच्छिन्नप्रकारकस्य च शाब्दबोधस्योपपत्तये विशेष्यताव
प्रकारत्वयोरवच्छेदकत्वेऽनवच्छिन्नत्वेन विशेषणीये। घटो नीलघट इत्याद्यन्वयबोधस्य प्रामा
णिकत्वे अन्यत्र दर्शितरीत्या सोऽप्युपपादनीयः। स स इत्यादिवाक्याज्जातित्वाद्यवच्छिन्नधर्मि
तावच्छेदकताक[illegible]न तद्धर्मावच्छिन्नप्रकारतावच्छेदकताकाभेदान्वयबोधवारणाय तद्धर्माव
च्छिन्नावच्छेदकताकप्रकारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वमप्यासत्त्या शाब्द

मु०मा०
१६

बोधे प्रतितद्धर्मभेदस्यापि पृथक्कारणत्वं कल्पनीयं। एवं दण्डवान् दण्डवान् इत्यादिवाक्याद्दण्डसं
योगत्वावच्छिन्नवत्तितद्व्यवच्छिन्नबुद्धिभेदान्वयबोधवारणाय दण्डसंयोगत्वाद्यवच्छिन्नावच्छे
दकताप्रकारतानिरूपितविशेष्यतानिरूपितसंयोगत्वाद्यवच्छिन्नावच्छेदकतानिरूपिता
वच्छेदकत्वसंबंधेन शाब्दबुद्धौ दण्डत्वादिभेदस्य पृथक्कारणता कल्पनीया। अवच्छेद
कतायां निरवच्छिन्नत्वनिवेशेऽपि पूर्ववद्बोध्यः। वस्तुतस्तु तद्धर्मान्यवृत्तिविषयतासंबंधे।
नज्ञाने प्रतितद्धर्मभेदत्वेन हेतुता लाघवात्। घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविशेष्यता
वच्छेदकतासंबंधेन शाब्दबुद्धिं प्रति घटत्वान्यवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य

मु०बा०
१७

व्यापकतयाघटत्वादेर्मादृशविषयतासंबंधेनस्वानवच्छिन्नोत्पादकसामग्रीविरहेणनता
दृशविशेष्यतावच्छेदकतासंबंधेनशाब्दबोधापत्तिः।एवंचघटत्वान्घटत्ववानित्यादिशाब्दबो
धवारणायानुरोधेनधर्मितावच्छेदकतावच्छेदकादिनिवेशस्यावश्यकत्वेतरमपिनकल्प
नीयं।एवमुद्देश्यतावच्छेदकविधेययोरैक्येनएकोद्वावित्यादिवाक्यादेकत्वद्वित्वाद्य।
वच्छिन्नएकत्वेद्वित्वाद्यवच्छिन्नादीनामभेदान्वयबोधानुदयात्।एकत्वत्वद्वित्वत्वाद्यवच्छिन्न
समवायादिसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितबसमवायादिसंसर्गा।
वच्छिन्नावच्छेदकतावच्छेदकतादिसंबंधेनशाब्दबुद्धौएकत्वत्वादिभेदस्य।कर्मणच्छतीत्या

रामः
१७

34

द्ये कर्मत्वत्वाद्यवच्छिन्ने आधेयतासंबंधेन तद्वृत्तौ मय्यबोधवारणाय कर्मत्वत्वाद्यवच्छिन्ना
वच्छेदकताकाधेयतासंसर्गावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वसंबंधेन एग।
च्छेदे कर्मत्वत्वादिभेदस्य। एतेन घट इत्याद्यनुमिते: शाब्दस्य च वारणाय घटत्वविच्छिन्न
भेदप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेनानुमितौ शाब्दबोधे च घटत्वादिभेदस्य
हेतुत्वान्न कस्पनमनादेयमेव। तद्धर्मभेदस्यैककारणतयैव सकलातिप्रसंगवारणसं
प्रवाप्तिरिति हतं पल्लवितेन। भेदान्वयबोधस्य प्रातिपदिकार्थधात्वर्थयो: प्रसपार्थेन क
त्विन्निपातार्थेन समममेव जायते। नत्वन्येन। समपि परार्थोपस्थितियोग्यतात्तानादि रूत

प्रकारतलकलापे राजा पुरुषः भूतले घट इत्यादौ च पुरुष घटाद्यंशे राजभूतलादेः स्वत्वाधेयत्वसंबं
धेन। तंडुलः पचति चैत्रः पच्यते इत्यादौ कर्मत्व कर्तृत्वादि संबंधेन तंडुल चैत्रादेः प्रकारे॥ स्वक
र्मकत्वस्वकर्तृकत्वादि संबंधेन पाकाद्यंशे वा तंडुल चैत्रादेरनन्वयात्। निपातातिरिक्तनामार्थ
धात्वर्थयोः क्रियाकारकत्वशब्दत्वेनार्थयोरभेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात्।
विभक्त्यर्थमन्तरा हल्वन्तयोरप्यन्वयबोधात् साक्षादिति। निपातातिरिक्तत्वविशेषणान् भू
तले न घट घटो न पट इत्यादौ घटादीनां नञर्थाभावेन मुखं चन्द्र इवेत्यादौ मुखचन्द्रादीनां इ
वार्थसादृश्यादिना॥ नञर्थनामार्थयोरिवाद्यर्थनामार्थयोर्निपातार्थनामार्थयोः सामान्ये व्युत्पत्तिरेवमेव यदि

ननुवेधित्वविशिष्टेष्टसाधनत्वस्यलिङर्थस्याभावेनधात्वर्थभक्षणादेरनुयोगितयागुरूपत्तेविध्य।
र्थोपूर्वांशेविशेषणत्वयान्वितेननतुपस्याप्राभावेनधात्वर्थभक्षणादेःप्रतियोगितयान्वयेपिन
क्षतिः। एवंपुरुषस्यादिसमासस्थलेतुपुरुषपदार्थेनसमंराजादिपदार्थस्यनभेदान्वयः किंतुतेनसमंवि
भक्त्यर्थविशिष्टलाक्षणिकआदिपदोपस्थाप्यराजादिसंबंधादेरभेदान्वयबोधएवेतिनदोषः। एवं
मुखचंद्रइत्यादिरूपकस्थलेचंद्रादिपदस्यचंद्रादिसदृशेलक्षणयामुखादौचंद्रादिसदृशाभेदान्व
यबोधएवेति। नतुमादृश्यसंबंधेनचंद्रादेर्मुखादावन्वयइतिनव्यभिचारः केचित्तुरूपकस्थले
चंद्रादिपदस्यनचंद्रादिसदृशेलक्षणा किंतुतत्रमुखादौचंद्रादेरभेदभ्रमोमुखादौमुखेनचंद्रइत्या

द्विविशेषदर्शनदशायां च न शाब्दाभेदप्रत्ययः अपितु शाब्दजन्यविशकलितपदार्थोपस्थितिमूलको मा
नस एव आहार्योऽभेदभ्रम इत्याहुः। परे तु तादात्म्यातिरिक्तसंबंधेन नामार्थयोर्नान्वयबोधः।
तादात्म्यं च प्रकृते न वृत्तिधर्मवत्। एवं च नीलो घट इत्यादौ स्ववृत्तिनीलत्वादिमत्वसंबंधेन घटादौ।
शे नीलपदार्थस्यैव। सुखं वेद्मि इत्यादौ स्ववृत्त्याह्लादकत्वसंबंधेन सुखादौ चेद्मादेरन्वयबोधः॥
नादप्रान्वयबोधेऽपि समानविभक्तिकत्वादिकं तंत्रमतो नातिप्रसंग इति वदंति। अथ राज्ञा।
पुरुष इत्यादौ पदार्थोपस्थित्यादिसत्वेन कथं न भेदेनान्वयबोधः। सामग्र्याः कार्यजनने उक्तनि
यमभंगापत्तेः प्रयोजनस्य तेरकिंचित्करत्वात्। सामग्रीसत्वे अवश्यं कार्योत्पत्तिरिति नियमात्। नव

तत्र भेदान्वयबोधोपयिकाकांक्षाविरहाद्धा कारणसामग्र्येवासिद्धेति वाच्यं। समभिव्याहाररूपाकां
क्षायास्तत्रापि सत्वात्। न च तादृशाकांक्षायास्तत्र सत्वेपि राजादिपदार्थप्रकारकभेदान्वयबो
धे राजादिपदाव्यवहितोत्तरऽस्पदत्वरूपानुपूर्वीविशेषात्मकाकांक्षायाः अपि प्रयोजकत्वा
त्तदभावादेव न तत्र तादृशशाब्दसामग्रीति वाच्यं। संबंधादिविशेष्यकराजादिप्रकारकान्वय।
बोधे एव तादृशाकांक्षाज्ञानस्य हेतुतया पुरुषादौ राजादिप्रकारकान्वयबोधोत्पत्तौ तादृशा
कांक्षाज्ञानरूपकारणविरहस्याकिंचित्करत्वात्। अत्र केचित्। नामार्थप्रकारकभेदान्वयबो।
धं प्रति समानविभक्तिकत्वासमस्तपदजन्योपस्थितेर्हेतुत्वकल्पनात्। नामार्थप्रकारक

०वा० २०

मैदाचयबोधेविशेष्यतयाप्रत्ययार्थस्यैवभाने। नत्नामार्थांतरस्य। तत्रविशेष्यतासंबंधेनप्रत्यय
जन्योपस्थितेरतत्वात्। नचसंबंधादेरपिनामार्थतयातत्प्रकारकान्वयबोधेपुरुषादिपदा
र्थस्यविशेष्यतयाभानानुपपत्तिः। तत्तन्नामपदजन्यतत्तन्नामार्थप्रकारकशाब्दबोधत्वावच्छि।
न्नंप्रत्येवप्रत्ययजन्योपस्थितित्वेनहेतुत्वेपिराजसंबंध्यप्रमेयोराजः पुरुषइत्येतादृशवाक्यादु
यजन्यबोधेपुरुषस्यराजसंबन्धिविशेष्यतयाभानानुपपत्तिरितिवाच्यम्। प्रत्ययाधीनोनन्तर
र्थोपस्थितिस्यजन्यतत्तदर्थप्रकारकशाब्दबोधत्वावच्छिन्नंप्रतिप्रत्ययजन्योपस्थितेः॥
समानविशेष्यताप्रत्यासत्त्याहेतुत्वोपगमात्। अथैवमपियत्रराजापुरुषइत्यत्रपुरुषपदप्रथमी।

एप. २०

नपुरुषोपस्थितौ प्रत्ययवत्त्वाद्यत्र कश्चित्प्रत्ययार्थोऽपि विषयीभूतस्तत्र प्रत्ययजन्यतथाविधसमू
हाल्लवनोपस्थितेर्विशेष्यतासंबंधेन पुरुषेऽपि सत्त्वात्तस्य राजप्रकारकान्वयबोधे विशेष्यतया भा
नापत्तिर्दुर्वारैव। नच प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेन उपच्छिते हेतुत्वोप
गमात्रापत्तिः समूहाल्लवनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया नात्र एव जन्यताव।
च्छेदकत्वादिति वाच्यं। तावन्मेदेन विशेष्यताभेदाभावाद्यत्र कुत्रश्चित्प्रत्ययादेवत्वलक्षणगारि
नापुरुषाद्युपस्थितिस्तत्र तादृशोपस्थितिनिरूपितप्रत्ययजन्यतावच्छेदकीभूतविशेष्यता
तः पुरुषादिपदजन्यपुरुषाद्युपस्थितिविशेष्यताया अभिन्नतया तावता व्याप्तिप्रसंगवार

पु०वा०
२१

ण्यासंभवादिति चेन्न। स्वजनकस्थानीयप्रत्ययत्ववृत्तिनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्ट
विशेष्यतासंबंधेनैवोपस्थितेर्हेतुत्वात् उक्तसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्य
तायाश्च तादृशोपस्थितिजनकस्थानीयप्रत्ययवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतासामाना
धिकरण्यविरहान्नातिप्रसंग इति वदंति। तदसत्। प्रत्ययत्वस्याननुगततया नतिप्रसक्तस्य दुर्वचत
या उक्तकार्यकारणभावकल्पनाया असंभवात्। राजसंबंधः पुरुषस्यादौ संबंधादिपदेऽ
स्पदत्वादिभ्रमदशायां संबंधादिविशेष्यकराजादिपदार्थप्रकारकान्वयबोधानुपपत्तेः।
राज्ञः पुरुषस्यादौ ऽस्पदादिषु संबंधादिपदत्वभ्रमसत्वेपि संबंधाद्यंशे राजादिप्रकारकान्व

राम:
रका २१

यवोधापत्तेश्च। नच प्रत्ययत्वेन ज्ञातस्यैव तन्मन्योपस्थितेः कारणत्वात् एवं दोषानवकाश इति
वाच्यं। राज्ञः पुरुष इत्यादौ ङस्प्रत्ययत्वाद्यनुपस्थितिदशायामपि आनुपूर्वीविशेषप्रकारक
ज्ञानाधीनतदर्थोपस्थितिसत्वे शाब्दबोधोत्पत्त्या प्रत्ययत्वप्रकारकज्ञाननिवेशासंभवात्। इदं
पुनरत्र तत्त्वं। राजा पुरुष इत्यादौ पुरुषादिविशेष्यकराजादिप्रकारकभेदान्वयबोधस्याप्रसि
ध्यैव नापत्तिसंभवः। यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषाद्युपस्थि
तिस्तत्र तद्विशेष्यकराजादिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्ध इति तन्न दृढं। तथाविधप्रकृति
प्रत्ययानुपूर्वीविशेषरूपाकांक्षाज्ञानसत्त्वे न तत्तद्विभक्तिजन्यपुरुषाद्युपस्थितिघटितसा

वा०
२२

मग्र्या एव तादृशबोधोत्पत्तिनियामकतया तदभावे देवनतदापत्तिः। अत एव स्वत्वादिसंबंधेन
राजादिविशिष्टपुरुषादितात्पर्यकतदादिपदघटितात् सुंदर इत्यादिवाक्यात्पुरुषादिविशेष्य
कस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्य प्रसिद्ध्या राजा पुरुषः सुंदर इत्यादौ पदार्थो
पस्थितियोग्यताज्ञानादिबलात् तादृशशाब्दबोधापत्तिरित्यपि निरस्तं। समं सुंदर इत्यादिवा
क्याधीनशाब्दबोधसामग्र्याः तत्पदत्वाद्यवच्छिन्नविशेष्यक। सुन्दरादिपदसमभिव्याहारस्या
न। सद्धृततदादिजन्यतादृशविशिष्टार्थोपस्थितिघटिततया तदभावे तदापत्त्यसंभवात्।
। अथैतादृशरीत्या आपत्तिवारणे राज्ञः पुरुष इत्यादौ स्वत्वादिसंबंधेन पुरुषादौ राजाद्यन्वयबो

शम
२२

धस्वीकारेऽपि क्षतिविरहात्। उक्तयुक्तेर्निर्युक्तिकैव। विभक्तीनां संबंधवाचकत्वमपि निर्युक्तिकं।
ऽनीलो घट इत्यादौ विशेषणवाचकपदसमभिव्याहृतविभक्तेरिव सर्वत्र विभक्तीनां साधुत्वमात्रा
र्थकत्वस्यैवोचितत्वात्। नहि तत्र तथाविधान्वयबोधोपगमेन तत्स्थलीयसामग्रीबलात् राजपुरु
षत्वादावपि तथाविधान्वयबोधप्रसंगः संभवति तत्स्थलीयसामग्र्याः षष्ठ्यन्तराजपदत्वाद्य
वच्छिन्नधर्मिकपुरुषादिपदनिरूपितसमभिव्याहाररूपाकांक्षाज्ञानघटितत्वात् तदभावा
देव तत्र सामग्र्यभावात्। एवं च राजपुरुष इत्यादिसमासे राजादिपदस्य स्वसंबंध्यादौ लक्षणा
स्वीकारोऽप्यर्थः। तत्र भेदान्वयबोधस्वीकारेऽपि क्षतिविरहात्। न च तत्र भेदान्वयबोधाभ्युपगमे

मु०वा०
२३

तत्स्थलीयसामग्रीवलाद्राजापुरुषइत्यादावपितादृशान्वयबोधापत्तिरितिवाच्यं। तत्स्थलीय।
शाब्दबोधे राजपदाव्यवहितोत्तरपुरुषादिपदत्वरूपानुपूर्वीविशेषज्ञानस्य हेतुतया असमा
सस्थले पुरुषादिपदस्य विभक्त्या राजादिपदव्यवहितत्वात् तादृशानुपूर्वीज्ञानासंभवेन त
त्रतादृशबोधसामग्र्या अप्रसिद्धेः। न च प्रकृतिप्रत्यययोरेवानुपूर्वीविशेषस्याकांक्षत्वात् प्राप्ता
तिपदिकद्वयाव्यवधानघटितोक्तानुपूर्वीविशेषज्ञानस्य हेतुत्वमेव निष्प्रामाणिकमिति।
वाच्यं। एवं सति राजपुरुषइत्यादौ यादृशसामग्रीवलाद्राजपदार्थराजसंबंधिपुरुषप
दार्थयोरभेदान्वयबोधस्तादृशसामग्रीवलाद्राज्ञः पुरुष इत्यादावपि राजादिपदस्य राजसं

राम।
२३

संबंधादौ लक्षणाग्रहसत्त्वे तादृशाभेदान्वयबोधप्रसंगवारणाय तथाविधानुपूर्वीज्ञान
स्य समासजन्यबोधे हेतुताकल्पनस्यावश्यकत्वात्। अस्माभिरपि भेदान्वयबोध एव तादृ
शानुपूर्वीविशेषज्ञाने हेतुतायाः कल्पनीयत्वात्। न चोभयमतेऽप्येवं राजसंबंधिनि राजपद
स्य स्वारसिकलक्षणया राजपुरुष इत्यत्र राजसंबंधिपुरुषयोरभेदान्वयबोधो भवत्विति यां।
स्क विशेषोऽपदस्यान्यत्वे असौ समासः षष्ठीतत्पुरुषः भवन्मते तु कर्मधारय इति। एवंच पुरु
षविशेष्यकाभेदसंसर्गकराजसंबंधिप्रकारकबोधे राजपदाव्यवहितोत्तरपुरुषपदत्वप्रका
रकज्ञानहेतुत्वमुभयवादिसिद्धमेव। भेदान्वयबोधे तादृशानुपूर्वीज्ञानहेतुताकल्पनमपि

०वा०
२७

कमितिवाच्यं। उक्ताभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां पर्यायशब्दान्तरघटितानुपूर्वी
ज्ञानस्य तथाविधाभेदान्वयबोधे व्यभिचारवारणाय तादृशानुपूर्वीज्ञानानन्तर्य्यस्य कार्य
तावच्छेदककोटावश्यं निवेशनीयतया तत्र विषयनिवेशप्रयोजनाभावेनादृशकार्य्यतावच्छे
दकस्यैवाभेदान्वयबोधसाधारण्येनानुपूर्वीज्ञानहेतुतायां अनाधिक्यात्। एवं तण्डुलं पचा
तीत्यादावपि पाकादिरूपे धात्वर्थे कर्मत्वादिसंबंधेनैव [illegible] तण्डुलादेरन्वयबोधः स्वीकर्त्तुमुचि
तः कर्मत्वादेः पाकाद्यंशे प्रकारत्वे तत्र द्वितीयादेः शक्तिकल्पने तादृशवाक्यजन्यशाब्दबो
धे कर्मत्वादिसंसर्गस्याधिकविषयताकल्पने गौर[illegible]वान्। न हि तण्डुलं पचतीत्यादिवाक्यज

राम:
२७

न्यशाब्दबोधसामग्रीबलात्तंडुलः पचतीत्यादावपि तथान्वयबोधापत्तिः संभवति। तादृशान्वयबो।
धे द्वितीयान्ततंडुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसमभिव्याहारस्य हेतुतया तंडुलः।
पचतीत्यादौ तादृशसामग्र्या अप्रसिद्धेः। एवं पचति चैत्र इत्यादावपि [illegible]तिसंबंधेन पाका।
देश्चैत्राद्यंशे अन्वयबोधस्वीकारे क्वचित् अनुगतोक्तरीत्या गौरवात्। तत्र तादृशान्वय।
बोधस्वीकारे तत्स्थलीयसामग्रीबलात् प्रथमान्तेन। पाकः चैत्र इत्यादौ तथाविधान्वय
बोधापत्तेरुक्तरीत्यैव वारणसंभवात्। मैवं। राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादि।
वाचकत्वमावश्यकं। अन्यथा पुरुषो न राजा इत्यादौ राजस्वत्वाद्यभावबोधानुपपत्तेः।

नहितत्रस्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकस्तत्राभावस्तत्रप्रतीयतेनतुस्वत्वाद्यभावः।
त्तिसंभवति।स्वत्वादिसंबंधस्यस्वरूपनियामकत्वमात्प्रतियोगितानवच्छेदकत्वेनतत्संबंधा।
वच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः अतएवस्वामित्वादिकंपरित्यज्यस्वत्वादेःषष्ठ्या।
र्थत्वंनवीनाःस्वीकुर्वन्ति।स्वामित्वादेःषष्ठ्यर्थत्वेतस्यनिरूपकतासंबंधेन धनांशेऽन्वयसं।
भवेपिनादृशसंसर्गस्यवृत्त्यनियामकतयाप्रतियोगितानवच्छेदकत्वेनतत्संबंधावच्छि।
न्नाभावस्यतत्राप्रसिद्धत्वसंभवात्।आश्रयतासंबंधावच्छिन्नाभावस्यतत्रसमभिव्या।
हारस्थलेऽभ्युपगमेचैत्रादिसंबंधिधनेपिआश्रयतासंबंधावच्छिन्नप्रतियोगिताकैवेचवर्त्ति

स्वामित्वाभावसत्वात् नेदं स्वैत्रस्येति प्रयोगापत्तेः। न च नञ्समभिव्याहारस्थलानुरोधेन षष्ठ्यादेः
स्वत्वादिवाचकत्वेपि राज्ञः पुरुषः इत्यादौ षष्ठ्याद्यर्थस्य संसर्गमर्यादया भानमुचितं तस्य प्रकारत्वो
पगमे तत्संसर्गस्याधिकस्य कल्पने गौरवात्। नञ्समभिव्याहारस्यैव तत्प्रकारकबोधनियामक
त्वाभ्युपगमेन सामग्रीबलात्। तत्प्रकारकबोधस्य तदसमभिव्याहारस्थले असंभवादिति वाच्यं
नञ्पदं विना यादृशसमभिव्याहारस्थले यत्र धर्मिणि येन संबंधेन यस्य विशेषणताभाने
नञ्समभिव्याहारे तत्र धर्मिणि तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यैव प्रतीयत इति स।
र्वजनीनानुभवस्यापलापापत्तेः। राज्ञः पुरुष इत्यादिवाक्यजन्यप्रमायामाधुनिकानां नास्के दि त।

बा०
६

बोधदशायां पुरुषो न एतत्स्वत्वादिना स्यादपि शाब्दबोधापत्तेः स्वत्वाभावबुद्धौ स्वत्वसंसर्गकज्ञान।
स्यविरोधित्वेमानाभावात्। स्वत्वनिष्ठामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वेपि एतत्तः पुरु
षत्स्वादौ स्वत्वादेः प्रकारताप्युपगमः समुचितः। अन्यथा तादृशसमभिव्याहारज्ञानघटितशाब्द
सामग्रीकाले एतत्स्वत्वाभाववान् पुरुषः सुंदरस्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्ष
वारणाय तत्तादृशसामग्र्याः प्रतिबंधकताकल्पनाधिक्येन गौरवात्। अस्मन्मते तादृशा
समभिव्याहारज्ञानघटितसामग्र्या एतत्स्वभाववान् पुरुषः इत्यादिबाधाभावघटिततया
तत्सत्वेविशेष्यतावच्छेदकादिप्रकारकनिश्चयरूपकारणज्ञानघटितसामग्र्या एतत्स्वत्वाभा

एम:
२६

भाववान् पुरुषइत्यादिबाधाभावघटिततयानसत्त्वेविशेष्यतावच्छेदकादिप्रकारकनिश्चयत्व
कारणविरहादेवतथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्तिसंभवेनतादृशसामग्र्यास्त
त्प्रतिबंधकत्वाकल्पनात्। अन्यादृशप्रत्यक्षस्थलीयप्रतिबंधकतयातुनतत्प्रतिनिर्वाहः।
अन्यत्रान्यविधप्रत्यक्षेच्छानामेवोत्तेजकत्वेनतादृशेच्छायामसत्त्वांउपदर्शितविशिष्टवै
शिष्ट्यावगाहिबोधत्वप्रकारकेच्छावलादुपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तयेअन्यादृश।
विषयतायाएवतत्रप्रतिबध्यतावच्छेदकत्वोपगमात्। नचस्वत्वादेःप्रकारतामतेपिस्वत्वा
दिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टपुरुषादिवैशिष्ट्यावगाहिबोधेत

उ०वा०
२७

थाविधसामग्र्याः प्रतिबंधकत्वकल्पनेनसाम्यमितिवाच्यं। तथापिनिरूपितत्वसंबंधावच्छिन्नप्रति
योगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधेतथाविधसामग्र्याः प्रतिबंधकत्वाकल्पनेनत
दृशेसाम्यात्। तथाचपूर्वोक्तराजस्वत्वाभाववान्पुरुषः सुंदर इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षं।
प्रतिराज्ञः पुरुषःपुरुष इत्यादिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पनेसंसर्गवादिमतेऽधिकमि
मिति। नचस्वत्वादेः प्रकारतामतेघटःप्रत्यक्षादिकंप्रतितादृशसामग्रीप्रतिबंधकतायांवि।
प्रतिराजस्वत्वाद्युपस्थितिनिवेशादिक्येनराजस्वत्वाभाववान्पुरुषइत्यादिबाधाद्यभा
वनिवेशाधिक्येनचगौरवं। अस्मन्मतेतादृशोपस्थितिबाधाभावादीनांतथाविधत्वा॥

रा०
२७

स्वजन्यशाब्दबोधं प्रत्यहेतुतया तादृशसामग्रीप्रतिबंधकतायां नेयामनिवेशादिति वा।
त्वं। भवन्मतेपि स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वस्वाभाववत्ता
न्न पुं पुरुषहस्त्यादिनिश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया तादृशवाक्यजन्यशाब्दधी
विरोधित्वात्तादृशनिश्चयाभावस्य तथाविधसामग्रीप्रतिबंधकतायां निवेशनाधिक्येन ला
घवानवकाशात्। मन्मते राजस्वस्वाभाववत्तानिश्चयादिबाधाभावनिवेशेनैव तादृशनिश्चय।
कालेप्रत्यक्षाद्यनुत्पत्तेस्तदभावानिवेशात्। यत्तु राज्ञः पुरुषहस्त्यादौ राजस्वत्ववान्पु
रुषहस्त्याद्यन्वयबोधे राजकीयस्वत्वे राजत्ववान्पुरुषहस्त्याकारकद्विविधानुमिते

वा०
८

रेवतदतिरिक्ताविषयकत्वेनतादृशानुमितिप्रतिप्रसेकेंतादृशवाक्यघटितसामग्र्याः प्रतिवेध
कत्वं हि। अस्मन्मतेचतादृशानुमितौस्तथाविधवाक्यजन्मा राजकोपः पुरुषहत्यैतादृश
वोधादतिरिक्तविषयकत्वात्तत्रतादृशसामग्र्याः प्रतिवेधकत्वकल्पनंनास्ति। तथाविधा
नुमितिशाब्दसामग्र्योः सत्त्वोरनुमितेरेवोत्पत्तेः। अपितुराजकीयः पुरुषहत्याकारक
त्वत्वसंसर्गकेयत्रविधानुमितिप्रसेवतादृशसामग्र्याः प्रतिवेधकत्वमेकंकल्पनीयमि
तिलाघवमितितद्व्यर्थंकिंचित्करं। भवन्मते यादृशानुमितिः स्वीक्रियते। अस्मन्मतेपितत्र।
तादृशानुमितेः स्वीकरणीयतया अनुमितौशाब्दसामग्र्याः प्रतिवेधकतासाम्यात्। ३५।

९१:
२८

दर्शितस्थले भवद्भिरनुमितिर्न स्वीक्रियते अस्माभिरपि न स्वीक्रियते कुतः प्रतिबंधकताद्रूपक
स्यनमिति। भवतापि तादृशशाब्दं प्रति तादृशानुमितिरूपसामग्रीरूपस्य प्रतिबंधकत्वाभावात्।
अनपायसाम्यात्। एवं राजपुरुष इत्यादिसमासवाक्यात् स्वत्वसंसर्गकशाब्दबोधस्वीकारे।
तादृशशाब्दबोधसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषत्वात्मर्यज्ञानादि [illegible] घटितायाः
मित्रविषयकप्रत्यक्षादिकं प्रतिबंधकत्वाधिक्येन गौरवात्। न च संबंधिप्रकारकाभेदान्व
यबोधस्वीकार एवोचितः। न च भवन्मतेपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबंधकता
धिक्येन गौरवमिति वाच्यं। राजपदस्य राजसंबंधिनि स्वारसिकलक्षणया ह्रदशायां अभे

इत्थं संबंधेन राजसंबंधविशिष्टपुरुषस्य प्रत्यक्षत्वे भवन्मतेऽपि कर्मधारयत्वेनाभिमतात्तथा॥

इत्थं च भेदेन राजसंबंधविशिष्टपुरुषात्मकार्थस्य प्रत्यक्षत्वे... अभेदेनैव तत्त्वमसि ... सामग्रीमत्तिवेधकत्तायां विधसमासवाक्यात्तादृशबोधस्वीकारस्यावश्यकत्वात् ... कर्मकबोधदर्शन उभयमतसिद्धत्वात्। यत्तु दधिपश्येत्यादौ लुप्तद्वितीयाविभक्तिस्मरणेन दधिकर्मकबोधवदेव राजपुरुष इत्यादावपि लुप्तषष्ठीविभक्तिस्मरणेन राजप्रकारकभेदान्वयबोधनिर्वाहे स्वीकृत्याभेदान्वयबोधो यत्र मौलिरर्थकः न च षष्ठीनस्युः राजसंबंधिनि निरूढलक्षणेति। स्वीकृत्याभेदान्वयबोधो यत्र ... राजमानेगा इत्यादिप्रयोगा वा इत्यस्यले लुप्तविभक्तिस्मरणे एव भेदान्वयबोधस्तदा राज्ञ इत्यस्य राजमानेगा इत्यादिप्रयोगानुपपत्ति। तत्र मानेगादौ राजादीनामन्वयबोधो ... पदोत्तरषष्ठ्यादिविभक्त्यनुसंधान

राम: २९

स्यावश्यकत्वे समानविभक्तिकतया राजादेरृद्धीपदार्थस्याभेदान्वयबोधसंभवादिति वाच्यं
यतस्तत्र ऋद्धराजादीनामभेदान्वयानुपपत्त्या नाभियुक्तानामप्रयोगः अपितु समासाघट।
कपदस्यापेक्षतया एकपदस्यासामर्थ्यातिदेशात् समासासाधुत्वेन। तत्सापेक्षत्वे च तद।
र्थान्वितस्वार्थपरत्वं। स्वार्थश्चात्र स्वीयवृत्तिग्रहविशेष्यः। अतएव शरैः शातितपत्रः चै
त्रस्य दासभार्येत्यादौ न समस्यमानशक्तितदासपदादेः सापेक्षता। तदर्थैकदेशेन तेन
दाशतादावेव शरकरणकत्वं चैत्रनिरूपितत्वानामन्वयात्। तदर्थान्विते सत्राभेदान्वयो वा
निवेशनीय इति। तदसत्। स्वारसिकलक्षणाया ह्रस्वत्वानुरोधेन तादृशसमभिव्याहारस्ता

सु०वा०
२०

नादेस्तथाविधो बोधस्योभयवादिसिद्धत्वेपि निरूढलक्षणामते संबोधितार्थस्यानादित्वक
ल्पनागौरवाभावात्। अनादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव निरूढलक्षणत्वादिति वा
च्यं। एवं पुरुषइत्यादिवाक्यजन्यशाब्दबोधात्पूर्वं नियममतो लुप्तविभक्तिस्मरणकल्पनोपस्
थानात्पूर्वमनादित्वकल्पनायां गौरवविरहादिति। नैवं वेदधियएवमीमांसादावपि दध्यादिवद्।
स्य दधिकर्मकादेर्लक्षणेन स्वीकृतस्य धात्वर्थेन समन्वयस्याभेदान्वयबोधोपपादनसंभवात्त
त्रापि लुप्तविभक्तिस्मरणकल्पनमनुचितमिति वाच्यं। दध्यादिपदस्य दधिकर्मकादेर्लक्ष
णाग्रहदशायामपि तस्माद्द्वितीयेनरविभक्त्युत्तत्वभ्रमदशायां दधिकर्मकः पश्यति दधि

रा०प०
३०

धिकर्मकेन पश्यतीत्यादाविवक्तत्स्थलेपि दधिकर्मकदर्शनान्वयबोधानुदयात्। भवन्मते दधि
कर्मकः पश्यतीत्यत्र दधि पश्यतीति स्थलीयदधिपदोत्तरपदत्वरूपाकांक्षादिसामग्रीसत्वा
द्दधिकर्मकदर्शनान्वयस्यापत्तिश्चेति द्वितीयांतदध्यादिपदत्वावच्छिन्नधर्मिकतादृशधात्वा
दिसमभिव्याहारज्ञानस्य तादृशान्वयबोधहेतुतया आवश्यकत्वात् दधि पश्यती त्यादौ
लुप्तद्वितीयानुसंधानस्यावश्यकत्वात्। राजपुरुषाद्यन्वयबोधे च राजादिपदाव्यवहितो
त्तरपुरुषादिपदत्वप्रकारकज्ञानस्य हेतुतया। स्वाश्रितकलाक्षणस्य स्थलानुरोधे।
नावश्यकल्पनीयतया राजपुरुष इत्यादौ राजादिपदस्य तत्तीयाद्यन्तत्वभ्रमदशायां।

पु० वा०
३१

जत्वेवं विपुरुषाद्यन्वयबोधापत्तेः संभवात्तृतीयादिविभक्त्यानवधानात्। दधिपश्यतीत्यादौ द-
धिपदाव्यवहितोत्तरत्वप्रकारकधातुपदज्ञानस्य हेतुतायाः अक्लृप्तत्वात्। पश्यति दधि।
पश्यति चैत्रो दधीत्यादावपि दधिकर्मकदर्शनान्वयबोधानादृश हेतुतायाः अशक्यकल्पना
त्वेति। न च तुलेयवतीत्यादौ न तुलादिपदस्यैव तंडुलादिकर्मकेलक्षणा विभक्तिस्तु साधु।
नार्थे एवं रात्रः पुरुषइत्यादावपि राजादिपदस्य संबन्धादौ लक्षणा विभक्तिः पाष्ठतात्प-
र्ये। तत्तद्विभक्त्यंतसमभिव्याहारस्य तत्र लाक्षणिकार्थबोधनियामकत्वात्तान्निप्रसंगः।
। विभक्तेरेव प्रकृत्यर्थे विशेषितस्वार्थलक्षणेति तु न संभवति विभक्तेः क्वापि शक्तेरक्लृ-

एवं
३१

सत्त्वात्तत्र शक्यसंबंधस्य लक्षणाया असंभवात्। नच्छुलः प्रमेय इत्यादौ विभक्त्यो मिश्रिनस्यैवमह।
स्वलाभात्। ■ मलतिशक्तेः स्वार्थेन्ह ■ सत्वात्तत्र लक्षणासंभव इति नुर्द्विलनीयं। राजादिपदस्य राज संबं
ध्यादिशक्तत्वस्य मदशायामिव तद्ध्ये लक्षणाग्रहदशायामपि राज संबंधिनः पुरुष इत्यादाविव राजसं
बंधि ■ संबंधीपुरुष इत्याद्यन्वयबोधस्य सर्वजनानुभवसिद्धत्वात्। पचति चैत्र इत्यादावपि हन्ति संबंधेन
पाकाश्रये चैत्राद्युद्देशे विशेषणत्वोपगमेन पचतीत्यादावन्वयबोधानुपपत्तिरिष्टस्या। हन्तिसंबंधस्या।
लिवस्य निपा ■ मकतयान् संबंधावच्छिन्नाभावस्याप्रसिद्ध्यान त्रुबोधस्यासंभवात्। अथैवमपि चैत्रो
ज्ञानातीमादौ चैत्राद्युद्देशे ज्ञानादेरध्यवतासंबंधेनान्वयबोधोपगमेपि क्षति विरहः आध्यवता।

वा०
२

संबंधस्याभावप्रतियोगितावच्छेदकत्वात्तज्ज्ञानातिचैत्रइत्यादौ आश्रयतासंबंधावच्छिन्नप्रतियोगि
ताकत्वानाछभावस्यैवभानसंभवात्। तथाचतत्राख्यातस्याश्रयत्वार्थकत्वंनियुक्तिकं। नचधा
त्वर्थत्वानादेराश्रयतासंबंधेनचैत्रादिरूपप्रातिपदिकार्थसाक्षात्प्रकारकत्वोपगमेज्ञानंचैत्रइत्या
दावपितथान्वयबोधापत्तिरितिवाच्यं। तादृशान्वयबोधे आख्यातान्तधातुसमभिव्याहारज्ञा
नस्यहेतुत्वात्। म[illegible]वनाप्याश्रयताप्रकारकबोधेतादृशसमभिव्याहारज्ञानहेतुतायाआव
श्यकत्वात्। यत्नुपचतिचैत्रइत्यादौपाकहृतिमांश्चैत्रइत्याकारकाख्यातार्थप्रकारकशाब्दबो।
धोसत्वात्तत्राख्यातजन्यकृत्युपस्थितेर्हेतुत्वकल्पनमावश्यकं। तथाचतत्तदर्थविशेषान्वये

रम:
३२

रूपात्मनिरूपसमासस्यापदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थि
ते; कारणतावाहुल्यमिसमर्थविशेषणानामिवेश्यधात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योप।
स्थितेः समानविशेष्यताप्रत्यासत्त्यैव हेतुत्वमुपेयते न तथा च तादृशकारणबाधेन चैत्रादेर्धात्व
र्थे तानादिविशेष्यतयाभानेन संभवति। यदि च धातुत्वप्रत्ययत्वादिना दुर्वचतया तादृशानुग।
तकार्यकारणभावकल्पनेन संभवति इति प्रमतन्तरापि यत्र तत्र धातोरेव प्राकारेण लक्षणा तत्र
जानातीति वाक्यप्रसाकहमादिप्रकारकान्वयबोधोत्पत्तौ तत्र धात्वर्थप्रकारकान्वयबोधे त
दूबवद्दिनोत्तरति त्वादिप्रकारकज्ञानजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुतायाः

वा०
३३

।तत्र कल्पनीयतया तादृशाकारणबाधो चैत्रादेर्ज्ञानादिविशेष्यतया चैत्रो जानातीत्यादेरनभानमि
ति। तदप्यसत्। प्रथमान्तार्थविशेष्यकशाब्दबोधे व्यभिचारवारणाय तादृशोपस्थितिवैशिष्ट्य
स्य कार्यतावच्छेदककोटावश्यं निवेशनीयतया तदनुत्तरशाब्दबोधे चैत्रादेर्ज्ञानादिविशेष्य
तयाभाने कारणबाधस्याकिंचित्करत्वात्। तादृशानुपूर्वीघटकत्वादिधानुजन्यज्ञानाद्युप।
स्थितिचैत्रादिरूपविशेष्योपस्थितियोग्यताज्ञानादिघटितसामग्र्या आश्रयतासंसर्गक।
शाब्दबोधाननेवाधकात्। नैवेतन्मते आश्रयतासंबंधेन ज्ञानप्रकारकशाब्दबोधे तादृशयोग्य
ताज्ञानहेतुताकल्पनाधिक्यं। आश्रयतासंबंधेन ज्ञानविशिष्टचैत्रादितात्पर्यकत्वस्य वै नाम्नः

एप०
३३

सांकेतिकशब्दोत्तराद्धू तादृशसंबंधेन ज्ञानादिप्रकारे चैत्रादिविशेष्यकशाब्दबोधस्य सर्वमतस
वप्रसिद्धत्वात् तादृशशाब्दबोधे पदार्थान्तरभाने नैयत्येन तन्निमित्तयोग्यताज्ञानस्य तत्र हेतु
ताया आवश्यकत्वात्। ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानस्य ज्ञानादिवि
शिष्टचैत्रादिविषयकशाब्दबोधहेतुतायाः क्लृप्तत्वादिति वाच्यं। एवमपि ज्ञाना।
श्रयताप्रकारकचैत्रादिविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतुतायाः आधि।
क्यात्। आश्रयतासंसर्गकज्ञानीयप्रकारतावच्छेदकस्य तदीयसंसर्गविषयताघटि
ततयानतिप्रकारकज्ञानत्वस्य कारणतावच्छेदकापेक्षया लघुशरीरतया आश्रयतायाः

वा० ३४

संसर्गभानमतस्यैव लघुत्वात्। न च पत्राश्रयत्वे तात्पर्याधानुसमभिव्याहृताख्यातस्य शक्तिभ्रमः लक्षणा
ग्रहो वा तत्र तत्ताना(?)श्रयत्व। प्रकारकशाब्दबोधस्योभयमतेसिद्धतया तत्रैनाहत्यबोधपतात्तान
हेतुत्वमप्युभयसिद्धमेवेतिवाच्यं। आश्रयत्वस्य पाः संसर्गत्ववादिनां तत्राप्याश्रयताप्रकारक
बोधस्यानभ्युपगन्तव्यत्वादिति चेत्। सत्यमेतदभिप्रायेणैव ज्ञानातीत्यादावाख्यातस्य निर्
र्थकतामस्मिकारञ्जरीचकार। न चाश्रयत्वे निरूढलक्षणामभ्युपगच्छतां दीधितिकाराणां।
पुनरेष आशयः। यत्र तात्पर्यानां(?)नाश्रयत्वे शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा न तत्र।
चैत्रादौ शेधात्वर्थैकदेशस्य तत्ता(?)नाद्रत्नत्वपानुपपत्या स्वरूपसंबंधेन तत्तानामाश्रयताप्रका

श्मः ३४

रकैचैत्रादि विशेष्यकान्वयबोध एवतत्रमालिन्यतास्वीकरणीयः नचज्ञानाश्रयताप्रकारकशा
ब्दबोधे तस्य कारकयोग्यताज्ञानहेतुभावात् स्वसत्वात् स्वाश्रयतासंसर्गकशाब्दबोधे। नादृश।
योग्यताज्ञानहेतुताकल्पनमधिमेवमलिनुन्मते। नचदीधितिकृन्मते तादृशयोग्यताज्ञानहेतु।
त्वाकल्पनलाघवेपि जानातीत्याद्यानुपूर्वीज्ञानघटितत्वाधातुशक्तिज्ञानजन्यज्ञानोपस्थिति
घटितसामग्र्याः भिन्नविषयकप्रत्यक्षादिके प्रतिप्रतिबंधकतायां। आख्यातजन्याश्रयतोप
स्थिति निवेशात् गौरवमिति तिवाच्यं। भवन्मतेपि ज्ञानाश्रयतावबोधेचैत्रः सुंदर इत्यादि वि।
शिष्टवैशिष्ट्यावगाहिप्रत्यक्षे जानाति चैत्र इत्याद्यानुपूर्वीज्ञानघटितत्वाधानुजन्योप।

प्र०वा०
३५

यस्थितिघटितसामग्र्याः प्रतिबंधकत्वाधिक्येन गौरवात्। मन्मते विरोधित्वानाश्रयत्वाभावव
त्वानिश्चयघटितत्वयात्तथाविधविशिष्टवैशिष्ट्यबोधसामग्र्याः तादृशशाब्दसामग्र्या
समेयुगपदवस्थानासंभवेन तादृशप्रतिबंधकल्पनाविरहात्। शेषं दर्शितदिशावसेयं।
एवं रीत्याभूतलेन घटरूपादेपरिचायकस्य घटप्रतियोगिकादेनदुत्तरसुविभक्तेरेव
वा प्रतियोगिनाश्चांलक्षणामभ्युपेत्य तत्र घटप्रतियोगिकाभावो भूतलवृत्तिरित्याद्याका
रकप्रतियोगिताप्रकारकशाब्दबोधोपगमएव समुचितः। तथासति तथाविधसमभि
व्याहारघटितसामग्र्या घटप्रतियोगिकत्वाभावोबात्। अभावः प्रमेयरूपादिविशिष्टवै

गप:
३५

शिष्यबुद्धिंप्रतिप्रतिबोधकत्वाकल्पनेनलाघवात् इत्युक्तनियमेनिपातातिरिक्तविशेषणत्वेवैयर्थ्य
मितिचेन्न। भूतलेनघटइत्यादौघटासेनाभावेभूतलाद्यन्वितसम्बन्धोऽधेयत्वस्यैवलाभस्य
त वशात्तद्देशेसम्बन्धेनभूतलादिवृत्तित्वाभावस्यान्वयबोधोऽनुभवसिद्धः अन्यथातादृशवा।
सञ्ज्ञस्याधामाल्पत्ताज्ञानात्स्कोतिवोधस्यभूतलेघटइत्यादिवाक्यजन्यघटादिविशेष्यक
भूतलाद्याधेयत्वप्रकारकबोधविरोधितायावानुभवसिद्धायाअनुपपत्तेः नञ्पदंविना
यत्रधर्मिणियस्यविशेषणतयाभानंयादृशसमभिव्याहाराद्भवतितादृशसमभिव्या
हारस्थलेनञ्सत्वेतत्रधर्मिणितदभावः प्रतीयतेइत्यनुभवापलापप्रसंगाच्च। एवंनञ्।

न्या०वा०
३६

थाभावेऽनुयोगितया घटाद्यन्वयबोधोपपत्तये निपातातिरिक्तत्वविशेषणमावश्यकं। एवेनप्र
वतिचैत्रः चैत्रस्य न धनं इत्यादौ षाकत्वनि चैत्रस्वत्वाभावस्य नञर्थस्य चैत्रधनादौ अन्वयबोधो
पपत्तये घटो न घट इत्यादौ नञर्थस्य घटभेदस्यान्वयबोधोपपत्तये च तदावश्यकम्। न चोक्त
स्थलेषु नञोऽभाववत्त्वलाक्षणिकतया अभाववतामनुयोगिनोऽभेदान्वयबोध एव तत्रो
पेयेन इति वाच्यं। तथा सति सर्वत्राभाववत्त्व एव नञर्थतया मुख्यार्थपरनञो दुर्लभत्वापत्तेः।
अभावस्याभेदान्वयबोधोपगमेऽपि कार्यकारणभावकल्पनाधिक्यविरहेणाभाववति लक्ष
णा नोचिता स्यात्। अभाववतोऽभेदान्वयबोधोपगमे भूतले घट इत्यादिवाक्यजन्यबोधे भूतले

राम
३६

न घटइत्यादिवाक्यजन्यबोधस्याविरोधितापत्तेश्च। लाघवात्स्वरूपसंबंधेनआधाराभावत्वि।
णयस्यैवविशिष्टबुद्धिविरोधित्वात्तत्वभेदसंसर्गकआधाराभावाश्रयप्रकारकत्वेश्चपस्ये
त्वि। नीलोघटइत्यादौविशेषणविभक्तेरभेदार्थकत्वमतेपियथोक्तरीत्यालाघवंसंभवति॥
तथापितत्रापिननोविद्वेषइतिदिक्। सम्याश्चविभक्तिःसुप्तिङादिभेदेननानाविधाः॥
विभक्तिःसुप्तिङ्भेदेनद्विविधा। सुब्विभक्तयःप्रथमाद्वितीयादयःसप्त। तत्रप्रथमार्थः
प्रकृत्यर्थेविशेषणत्वेविधया अन्वयिनीसंख्यैव। अतएवयत्रविशेष्यवाचकेपदेविपातप
देवानास्तितत्रप्रथमातात्पर्यस्यविशेष्यभासकसामग्र्यभावादेमुख्यविशेष्यतयैवभासते।

मु॰ वा॰
३७

संख्यावाचकानां च एकवचनद्विवचनबहुवचनानां एकत्वद्वित्वबहुत्वावच्छिन्नेषु शक्तिः ।
शक्तता च सु औ जस् इत्यादिना । ननु सुप्तिङ्साधारणैकवचनत्वादि हेतु
वेदत्वात् । न चैकत्वादिवाचकत्वेन तत् । न हि वाचकता या शक्तता रूपत्वे आत्माश्रयप्रसंगात् ।
बोधकता रूपत्वे शक्तिभ्रमेण द्विवचनादीनामपि एकत्वबोधकतया आनतप्रशक्तत्वात् ॥
न चैकवचनत्वादिकं जातिविशेषः । सुप्त्वादिना संकरात् । न च शक्तिसंबंधेनैकवचना
दिपदवत्त्वेन तत् तत्स्थानदृशार्थाच्च सुत्वादिना शक्तिभ्रमादेव शाब्दबोधः एकवचनादिशब्द
स्यपदद्वयात्मकतया तादृशसमुदाये शक्तिरेतामसिद्धेहुतेति तु नाशंकनीयं । एकं वक्ती स्यादि ।

रामः
३७

74

सुप्त्वस्यैकवचनादिशब्दस्य त्वादिबोधकत्वे एकादिशब्दे पितादृशस्य मुद्रायशक्तिरेनाप्रसिद्धे
त्तिना शंकनीयं। एकं वक्तीत्यादि सुप्त्वस्यैकवचनादिशब्दस्य त्वादिबोधकत्वे एकादिशब्दे।
पितादृशव्युत्पत्तेः एकवचनादिशब्दस्य त्वादेः स्वेच्छया स्वीकारस्याव्यवस्थितत्वादित्ति वा।
चं॰ ग्रंथकारीयसंकेतेनैवोपपत्तौ एकवचनादिशब्दे शक्तेरप्रामाणिकत्वात्। द्वौकयोर्द्विव
चनैकवचनइत्यादिपाणिनिसूत्रस्य तदीयसंकेतेन ग्रहणपरतयाप्युपपत्तेः नहि सूत्रस्था।
त्वौ न दीर्घवत्शासनान् स्वात्यन्तइदं तादिशब्दे। न यादिं हि पदस्य शक्तिः सिध्यति किंतु।
तदीयसंकेतेनएव। अतएव नव्याः प्राचाः संज्ञा; आधुनिकसंकेतेन शालितात्। परिभाषिकस्य

75

अ०वृ०
३८

एवन्नत्वोपाधित्वात्। अथैवमपि पाणिनिसंकेतसंबंधेन तादृशपदत्वमेव एकत्वादिशक्तताव।
च्छेदकमस्त्विति चेन्न तादृशसंकेतस्य केनरूपेण संबंधता संकेतत्वेन चेत् तर्हि कस्यचित्सुसरए
कवचनपदादिनौजसादिघटित्वइत्याकारकसंकेतस्यापि संभवादतिप्रसक्तिर्दुर्वारैव॥
पाणिनिसंकेतत्वेन चेत्। तर्हि व्याकरणमप्रणेतृपुरुषान्तरस्यापि तादृशसंकेतसंभवात्।
तदीयसंकेतसंबंधेन तत्पदत्वस्य डित्थादिपदानत्वौजसादिघटित्व[illegible] इत्याकारकपुरु।
षविशेषसंकेतसंबंधेन डित्थादिपदत्वस्य च विनिगमनाविरहेण एकत्वशक्ततावच्छेद।
कतमसंगस्तथा च वाणस्यानुपूर्वी विशेष एव शक्ततावच्छेदक इति। यत्तु संख्यापि प्रकृते

रा०मु
३८

र्थः॥ एकवचनादिकं च एकत्वाद्यर्थतात्पर्यग्राहकमेव। नचैवमेकपदस्थसुपस्थाप्ययोरर्थयोः परस्परा
न्वये आकांक्षाविरहात् घटादावेकत्वाद्यन्वयानुपपत्तिः अन्यथा हर्यादिपदादुपस्थितयोरश्वसू
र्ययोराधाराधेयभावेनान्वयापत्तेः॥ घटादिपदस्य एकत्वादिविशिष्टघटादौ च न शक्तिसंभवः।
घटस्यैव पश्चैकत्वादौ संख्यानवच्छिन्नघटादेरेवान्वयबोधादिति वाच्यं आकांक्षावैचित्र्यादेक
पदस्थसुपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसंभवात्। अत एव श्वेतः शङ्खे वकारादघु
पस्थाप्ययोरन्वयोगशब्दावच्छिन्नयोः परस्परमन्वयबोधः। नचैवं कर्मत्वादिकमपि शब्द
मर्थ एवास्तु किं तत्र द्वितीयादिशक्त्येति वाच्यं। अन्यथात्वर्थयोः साक्षाद्भेदान्वयबोध

व्यु०वा०
३६

स्यामुत्पन्नतयाकर्मत्वादेर्नामार्थत्वेनेनसमभेदान्वयासंभवात्। नचसंख्यायाः प्राति
पदिकार्थत्वेसतितात्पर्यग्राहेनविनैवशक्तिभ्रमेलक्षणाग्रहंच द्विवचनाद्युत्तरपदादेकत्वबोध
संभवात् एकत्वादितात्पर्येणएकवचनान्तस्यैवद्विवचनाद्युत्तरस्यापिपदस्यस्वारसिकप्र
योगापत्तिरितिवाच्यं। अनेकत्वादितात्पर्येस्यैवस्वारसिकप्रयोगमूलत्वात्। एकवचनाद्युत्तरपद
स्यैवएकत्वादावनादितात्पर्येणप्रयोगेनातिप्रसंगविरहात्। द्वयोर्द्विवचनैकवचनेइत्याद्य
नुशासनेवचनाद्यर्थेतात्पर्यग्राहकमेवेतिवैयाकरणमतंतत्रदसत्। अनन्तानांप्रकृत्यानु।
पूर्वीणांशक्ततावच्छेदकत्वापेक्षया अन्यतरविभक्त्यानुपूर्वीणामेकत्वादिशक्ततावच्छे।

रामः
३६

दकतास्यैवोचितत्वात्। नच प्रातिपदिकत्वमेव तच्छक्यतावच्छेदकं न तु घटत्वपटत्वादिकमिति न।
शक्यानेकत्वस्यापि तिवाच्यं। प्रातिपदिकत्वस्य दुर्वचत्वात्। न च तत्तानेक्येकत्वादिबाधस्यानुभवासि
द्धत्वाच्च। पदत्वेन वर्णस्य नवा शक्तत्वे विभक्तेरपि तद्वाचकतासिद्धेः एकत्वादिशाब्दबोधात् पूर्वं वर्ण
त्वाद्युपस्थितेरप्यनावश्यकत्वाच्च। कत्वानुरोधेन तत्तत्धर्मे नेच कल्पनागौरवात्। एवमानुपूर्वीभि
न्नधर्मस्य वाचकतावच्छेदकत्वे घटपदे सुपदे च न संख्यावाचकमिति विपरीतनिश्चयकालेपि।
नादृशधर्मावच्छिन्नस्य वाचकताग्रहसंभवात् घटदस्यादेः संख्यायाबोधापत्तिः। अथवि
भक्तीनां संख्यार्थकतामते प्रकृतिविभक्त्योरेकवाक्यतानिरूढनिश्चयदशायां विभक्त्युपस्था

८ वा०
३०

ष्यस्यैकत्वादेः प्रकृत्यर्थेऽन्वयबोधवारणाय तयोः समभिव्याहारज्ञानस्य घटादिविशेष्यकैकत्वाद्य
न्वयबोधं प्रति कारणत्वमधिकं कल्पनीयं। एकपदोपस्थापितयोर्धर्मैकत्वाद्योरन्वयबोधोपग
मेव। न समभिव्याहारज्ञानस्य तत्र हेतुता कल्प्यते इति लाघवात् प्रकृत्यानुपूर्वीत्वं संख्यावाच
कतावच्छेदकत्वमुपेय। न इति चेन्न। आकांक्षाविचारे समभिव्याहारज्ञानहेतुताया निराकृ
तत्वात्। अथैवमपि विभक्तेः संख्यार्थकत्वेऽपि [illegible] निगमनाविरहेण प्रकृतिधर्मि
कस्य विभक्तिधर्मिकस्य च संख्याप्रकारकान्वयबोधपरत्वज्ञानस्य हेतुता कल्पनीया विभक्ते
र्धर्मिकत्वे तु विभक्तौ तात्पर्यविरहेण प्रकृतिधर्मिकमेव तात्पर्यज्ञानं तादृशान्वयधीहेतुरिति

रा.प.
८०

व्यु० वा०
७२

विनिगमकं दुर्लभं। नचैकत्वाद्यन्वयबोधे घटपदादिज्ञानजन्योपस्थितित्वेन तद्धेतुताकल्पनमपेक्ष्य स्वा।
दिपदज्ञानजन्यतदुपस्थितत्वेन कतिपयहेतुताकल्पनायां लाघवात् कतिपयशक्तिकल्पने गौरवम्
किं चित्करं। सामान्यतः पदवृत्तिज्ञानजन्यतदुपस्थितित्वेन कारणताकल्पनेन तु न सम्यक्। निर्विभक्तिक
कुंभपदादिना। संख्योपस्थितौ न दृष्टहीनत्वलिकघटादिपदेन तद्विभक्त्येतत्त्वज्ञानवतः पुंसो घटादौ सं।
ख्यान्वयबोधप्रसंगात्। घटादिज्ञानजन्यएकत्वाद्युपस्थितित्वेनैकत्वादिविषयकशाब्दबोधे हेतुतां
कल्पयित्वा विभक्तिघटादिपदज्ञानानुपूर्वीज्ञानेनाहृत्योपस्थित्योः परस्परसहकारेण फलजनकता
या अवश्यापेक्षणीयत्वादिति वाच्यं। घटादिपदस्यैकत्वादौ लक्षणाग्रहसत्त्वे घटः प्रमेयत्वादिवा

राम:
७२

क्यादेकत्वं प्रमेयमित्याद्यन्वयबोधस्य सर्वमतसिद्धत्वात् तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादि
पदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्वसंमतत्वात् । किंच । यादृशयादृशपदानां लक्षणया एकत्वा
दिशाब्दधीजनकत्वं नोभयवादिसिद्धं तादृशानंतपदानां जन्यैकत्वाद्युपस्थितीनां तच्छाब्दबोधे हेतु
त्वकल्पने महानेः संख्यावाचकत्वादिनामधिकमिति तत्कल्पनापेक्षया वाच्यतरस्याद्यपदजन्यैक
त्वाद्युपस्थितिहेतुताकल्पनमेव लाघवं । एतेन संख्याविशेषावच्छिन्नं घटादिलक्षणया प्रकृतेरर्थः
न तु संख्याविभक्त्यर्थः शाब्दबोधे विभक्तितस्य संख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात् ।
। घटादिपदस्यैकत्वविशिष्टघटादौ लक्षणाग्रहदशायां सर्वमतेनैव तज्जन्यैकत्वादिविशिष्टविषय

व्यु० वा०
८२

कोपस्थित्याविशिष्टविषयकशाब्दधीजननात्तथाविधोपस्थितिहेतुतायाः सर्वानुमतत्वात्। यदि तु
रासपभिद्याहृतात् घटादिपदादेकत्वादिविशिष्टघटादिशाब्दबोध एवेति त्वलीकं उद्बुद्धकपस्मरणस्य
तन्त्रोपगमात्। तथा चोक्तं सर्वं हि वाक्यं क्रियायां परिसमाप्यत इत्यपि निरस्तं। यादृशपदानां लक्ष
एकपदार्थकत्वादिविशिष्टस्वार्थबोधहेतुत्वं नोपपदवादि सिद्धं तादृशानेन पदजन्यस्य विशिष्टोपस्थि।
तीनां शाब्दधीहेतुताकल्पनमपेक्ष्य विभक्तिजन्योपस्थितीनां तत्कल्पने लाघवात्। इदं पुनरिहा
वधेयम्। विभक्तेः संख्याबोधकत्वे समानविषयकानुमित्यादिकं प्रति शाब्दसामग्र्याः प्रतिबन्धकता
यां प्रातिपदिकजन्यघटाद्युपस्थितिर्विभक्तिजन्यसंख्योपस्थितिः प्रवेश्या। तयोर्भिन्नो विशेष्यवि

ए
८

रोधरूपाभावे विनिगमनाविरहेण प्रतिबंधकतावाकुल्यम् । प्रकृते विशिष्टलाक्षणिकत्वेन उभयस्थली
यविशिष्टविषयकोपस्थितिरेकैव सामग्र्यामन्तर्भवतीति लाघवम् । न च विशिष्टविषयकोपस्थितेर
पि एकत्वावच्छिन्नप्रकारतानिरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितएकत्वादिविष
यताशालित्वेन वा विनिगमनाविरहात् साम्यमिति वाच्यम् । यतो भवन्मते योग्यतास्थाने घटेपि स्थि
त्येकत्वोपस्थितीनां नानिन्त्वं विशेष्यविशेषणताभावे
विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावपञ्चकं मन्मते तत्र योग्यतास्थाने विशिष्टविषयकोप
स्थितेः प्रत्येकं दर्शितोभयरूपेण वैशिष्ट्यं निवेश्य तदुभयं प्रत्येकं । तादृशरूपद्वयावच्छिन्नायामु

२ ण्मतीसारेप्रकर्षे २

पस्थितेर्योग्यताज्ञानस्यैव विशिष्टं निवेश्यद्वयमितितच्च तुल्यमात्रामितिरीत्यास्माकमल्पतरत्वकल्प
[illegible] विशिष्टनतिर्धातूनामेवार्थः मादयोद्योतका

सु०वा० ७२

नेमहालाघवं। नादृशरीत्यैवच प्र[illegible]परिष्कर्तुं शक्यते। अन्यथाऽनेनधातुजन्यप्रकर्षा
एवनतुप्रकर्षादिवाचका इति सर्वानुमतः पंथाः कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थि
तिविशिष्टतत्तत्स्वार्थोपस्थितौ नों शाब्दधीजनकतामपेक्ष्य स्वादीनामिव प्रादीनामपि वाचकता निराबाधा सिद्ध्येतेति॥
तीर्थानां ज्ञनकताकल्पने लाघवात् ... द्विना। तथासति एकव्यक्ति

एम: ७२

संख्यायाश्च प्रकृत्यर्थेपर्याप्तिसंबंधेनैव विशेषणत्वेन तु समवायादिना। तथासति एकव्यक्ति
संख्यायाश्च प्रकृत्यर्थे पर्याप्तिसंबंधेनैव विशेषणत्वं नतु समवायात् ... तत्तदर्थयोर्द्वित्वबहुत्वयोः समवाया
मात्रबोधपरादाकाशशब्दादपि द्विवचनबहुवचनाद्यापत्तेः। तत्तदर्थयोर्द्वित्वबहुत्वयोः समवाया

85

दिना आकाशशब्दान्वययोग्यत्वात्। नचपर्याप्तेः संसर्गत्वेपि तद्दोषतादवस्थ्यं। घटाकाशादौ छित्वा
दे:पर्याप्तिसत्त्वे प्रत्येकमाकाशादौ तत्पर्याप्तिर्नास्तीति वक्तुमशक्यत्वात्। प्रत्येकस्योभयानतिरिक्त।
त्वादितिवाच्यं। उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव संसर्गतोपगमात्। आकशत्वा।
दिव्याप्यताया छित्वादिपर्याप्त्यभावसत्त्वेनातिप्रसंगविरहात्। वैशिष्ट्यं चैवेशानिकं नतु वास्तवं ॥
तेनयत्रयोग्यताभ्रमस्तस्य; अत्राकाशत्वविरहादिवाक्यजन्यछित्वादिप्रकारकाकाशबोधस्तत्र।
विशिष्टसंसर्गाप्रसिद्धावपि नक्षतिः। छित्वादिपर्याप्त्यभावस्य तत्र प्रसिद्धस्याकाशत्वादिव्याप्यत्वस्य
श्रितेस्तत्रोपगमात्। संबंधतावच्छेदकांशे भ्रमत्वस्यासत्त्वोपपादितत्वात्। नचप्रकृतसंसर्गतावच्छे

मु०वा०
८८

दकः व्यापकतासंबंधेनद्वित्वान्वयधीः किन्नोपेयादितिवाच्यम्। घटाविमादौ घटत्वादीनांस्वरूप।
नएवोपस्थितत्वान्तत्रैनएान्वयबोधासंभवात्। स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्वरूपपरंपे
रापाएवप्रकृतसंध्येद्वित्वादेः संबंधत्वंस्वीकारेचव्यापकतारूपसंबंधतावच्छेदकोद्देश्यमत्वस्वीकार।
स्यावश्यकतयाउद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः संसर्गतापेक्षानिर्बीजा। अथात्र
व्याप्तिर्व्यापकसामानाधिकरण्यरूपस्यैववाच्यानतुतद्घटकव्याप्तित्वरूपाकेवलान्वयिधर्मस्य।
प्रकृतसंध्यतावच्छेदकत्वं यत्रतत्राप्रसिद्धेः। एवंचोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्य
येक्ष्यपालघोः स्वव्यापकताघटकधर्मवत्वस्यैवसंबंधत्वमितिचेत्। तर्हि आकाशेनद्वित्वादि।

ए
८

वाक्यजन्यशाब्दबोधदशायामप्याकाशाद्विसादिवाक्याद्धित्वबोधापत्तेः तथाहि। आकाशनद्दविसा

दितो द्वित्वावच्छिन्नभेदः प्रतीयते सच न स्वव्यापकाकाशत्ववत्त्वसंबंधावच्छिन्नप्रतियोगितावच्छेदक

ताकः तादृशसंबंधेन द्वित्ववतो ऽप्रसिद्धेः अपितु पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकता।

कएव। तज्ज्ञाने च पर्याप्तिसंबंधेन द्वित्वविशिष्टबुद्धिरेव प्रतिबध्यते न तूक्तपरंपरासंबंधेन तद्वि

शिष्टबुद्धिरपीति अथाकाशतद्विसादि केवलपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छे

दकताकभेदो न त्वाबोधयितुं शक्यते। आकाशेऽप्युक्तयुक्त्या द्वित्वपर्याप्तेः सत्त्वेन तत्र तेन संबंधे

न तद्भेदस्य वक्तुमशक्यत्वात्। आकाशत्वव्याप्यपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकता

अ०वा०
८५

कद्वित्वादिप्रभेदस्यापि सिद्ध एवेति चेन्न। द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मेणैवावच्छेदात्॥ तदनव
च्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्भेदस्य तेन संबंधेन द्वित्वादिमतो भेदस्य च न द्वित्वे बाधका
भावात्। नन्वेवं घटपटोभयेन द्वावित्यपि प्रयोग आपद्येत घटपटयोरपि प्रत्येकं द्वित्वावच्छिन्नभेदसत्वादि
ति वाच्यं। द्विवचनाद्युपस्थाप्य द्वित्वाद्यवच्छेदेन द्वित्वाद्यवच्छिन्नभेदस्य बाधेन तादृशप्रयोगाभा
वोपपत्तेः। नञाद्यासत्त्ववृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदश्च द्वेश्यतानवच्छेदकावच्छेदेनैव बो॥
ध्यत इति प्राचीनैर्द्वित्वसामानाधिकरण्येन तद्बाधस्याकिंचित्करत्वात्। न च घटत्वादेरतिप्रसक्ततया
द्वित्वादिपर्याप्तेरनवच्छेदकत्वात् तदवच्छेदेन द्वित्ववत् भेदस्य भवतामप्यनुमतत्वात्स्वहलसपर्यगते

एम:
८५

कत्वाविवक्षायांघटेनद्वित्वादिप्रयोगापत्तिरितिवाच्यं। तादृशप्रयोगाभावेघटत्वादेर्द्वित्वादिपर्याप्तेरिवद्वित्वा
दिप्रमेयस्याप्यनुयोगितावच्छेदकताया अप्रामाणिकत्वात्प्रतियोगितावच्छेदकानवच्छेदकतायाभेदाव।
च्छेदकतानियतत्वासिद्धेः अन्यथानियमसत्वेपिघटत्वादिर्द्वित्वपर्याप्तेरवच्छेदकः घटादिर्द्वित्वादिमतीति
बलात्। वस्तुतस्तुघटत्वादेः प्रमेयेकद्वित्वपर्याप्त्यनवच्छेदकत्वेपिद्वित्वपर्याप्तितावच्छिन्नानतिप्रसङ्ग।
क्तनयातदवच्छिन्नावच्छेदकत्वमप्यादृतमेव। अथपर्याप्त्याख्यविलक्षणसंबंधएवाप्रामाणिकः
तत्कथंतत्संबंधता। आकाशोनद्वावितिप्रतीत्यसमवायेसंबंधावच्छिन्नप्रतियोगितावच्छेदक
ताकभेदविषयकएवास्ताम्। आकाशादेर्द्वित्वादिसमवायसत्वेपिद्वित्वादेरेवोभयवृत्तिधर्मानुयोगितावच्छे

90

मु० वा०
७६

दक। त्वोपगमात्तदनवच्छेदकाकाशत्वावच्छेदेन तद्वृत्तेर्भेदस्य बलेनाबाधकाभावादिति चेन्न। अकाशादिसा
दिवाक्यजन्यप्रमापादबोधस्याप्रमात्वाप्रथानुपपत्तेर्वृत्तादृशसंबंधसिद्धेः। तादृशबुद्धेः समवायविषयक
त्वेपमात्वनिराकरणस्याशक्यत्वात्। उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य संसर्गतोपग
मेघटादिसादिवाक्यस्याप्रमात्वानापत्तेः। समवायस्यैक्येन घटादिनिष्ठस्य द्रव्यत्वादिसमवाय
स्य घटादावपि सत्त्वेन घटत्वाद्यव्याप्यत्वात्। न चोद्देश्यतावच्छेदकव्याप्यद्रव्यत्वादिसमवायत्वेनैव
संबंधतास्तु द्रव्यत्वादिसमवायस्य घटत्वाद्यव्याप्यत्वेपि द्रव्यत्वादेस्तद्व्याप्यत्वात् घटादिसादेरपि प्रमा
णतेति वाच्यं। एवं सति तथाविधद्रव्यत्वादेरेव लाघवेन द्रव्यत्वादिसंबंधत्वौचित्यात्। अथास्त्वेवमेव।

रामः
७६

नाघत। पिण्डं नास्ति संबंधस्याविलयादिति चेन्न। द्वित्वादिस्वरूपस्यैव द्वित्वादिपर्याप्तिरूपतयाभिमतसिद्धेः। उ
क्तं च दीधितिकृता पर्याप्तिश्चायमेको घट इमौ द्वौ इत्यादिप्रतीतिसाक्षिकः स्वरूपसंबंधविशेष इति। यत्तु सम
वायस्य नानात्वमते च द्वित्वादिसमवाय एव तु तत्पर्याप्तिर्न तु स्वरूपमतिरिक्तपदार्थो वेत्यसन्देहात्। यत्तु आ
काशे न द्वे इत्यादिप्रतीतिविदाकाशे न द्वित्ववदिति प्रतीतेः। प्रमात्वस्य वारणाय समवायेन द्वित्वादिम
द्भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः। तथा च पर्याप्तेरविलक्षणत्वे आकाशे न द्वे इत्यादिप्रती
तेः प्रमात्वापत्तिरिति तन्न आकाशे न द्वित्ववदिति प्रतीतौ हि द्वित्वसमवायावच्छिन्नभेद एव
विषयः प्रतियोगितासंबंधस्य लुप्तत्वात्। ननु द्वित्वाद्यवच्छिन्नभेदः। एवं चाकाशे [illegible]
[illegible]

मु०वा०
८७

द्यवच्छेदेनद्वित्वाद्यवच्छिन्नभेदाभावस्वीक्रियतेनतुतत्संबंधावच्छिन्नस्याकाशेनद्वेइतिप्रतीतेरप्रमात्वस्या
काशेनद्वित्ववदितिप्रतीतेर्वाप्रमात्वस्यनप्रसंगइति।अथोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वादिसं।
बंधत्वे धवखदिरौछिन्नतीत्यादौउद्देश्यतावच्छेदकीभूतधवखदिरत्वादिद्वयमेवप्रसेतत्संनतुधव
खदिरादिपर्याप्तद्वित्वादिकं।तथाचैकैकधवखदिरादेर्नास्यैरुक्ततथाप्रयोगानुपपत्तिरितिद्वित्वा
न्वयितावच्छेदकंअपेक्षाबुद्धिविशेषविषयत्वादिरूपमुभयादिनिष्ठंसादिर्वंद्वंद्वसमासार्थोवा
अस्तुतथाचमीमांसकमतप्रवेशइतिचेन्न।यत्रएकधर्मस्यद्वित्वाद्युद्देश्यतावच्छेदकतात्रैवोद्दे।
श्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेःसंसर्गतानियमः।यत्रधर्मद्वयादेस्तथात्वंतत्रकेवलो

राम:
८७

पर्याप्तेः। समवाय एव वा संसर्ग इत्युपगमात् विनैव लाघवमस्यान्वयितावच्छेदकतां एकैकत्वात्सर्व एव धवख
दिरादिविशिष्टप्रयोगोपपत्तेः। नैवमेकैकधवखदिरत्वान्वये एकस्यापि धवो खदिरादिविशिष्टप्रयोगापत्तिः॥
तादृशवाक्यद्वयविषयकसमूहालम्बनजन्यसमूहालम्बनशाब्दबुद्धेर्नानाधर्मावच्छिन्नोद्देश्यता
कतया शुद्धपर्याप्तेरपि संसर्गता वक्तव्या हि धानसंभवादिति वाच्यं। यत्र नानाधर्मावच्छिन्नविशेष्यता
निरूपितत्वेनैकत्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात्॥
धवो खदिरो इत्यादिनानावाक्यजन्यसमूहालम्बनशाब्दबोधे विशेष्यताभेदेन प्रकारताभेदादु
द्देश्यतावच्छेदकधवत्वादिमत्त्वविशिष्टपर्याप्तेः संसर्गतानियमेन एकैकधवखदिरादितास

मुक्ता०
४८

थेस्तथाप्रयोगासंभवात्। धवखदिरौविस्यादिसमादिसमासोत्तरद्विवचनेनचधवत्वखदिरत्वाद्युपस्थि
त्वनानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिज्ञानमेवजन्यते। तादृशशाब्दज्ञानबोधस्यस
मूहालंनानात्मकतयाविशेष्यताभेदेनप्रकारताभेदाभावात्। यथाहिसमूहालंबननानात्मकेख।
द्वीचैत्रः कुंडलीत्याकारकनानाविशेषणकैकज्ञानेनानाप्रकारतानिरूपितैकाविशेष्यतातथा
तथाविधधवखदिरौविस्याकारकेनानाविशेष्यकैकविशेषणकज्ञानेविशेष्यताभेदेप्यभिन्नेव।
द्वित्वादिप्रकारता। अन्यथासमूहालंबनतः तेद्वैलक्षण्यानुपपत्तेः समासघटकधवखदिरा।
दिपदानांएकवाक्यभानुपपत्तेः। तस्मयोज्यविषयतयासाक्षात्परंपरयावानिरूपितायाविषय

एम:
४८

तात्पर्ययोजनकत्वस्यैव तदेकवाक्यतापदार्थत्वात्। नचैतादृशैकवाक्यताविरहेपि क्षतिविरहः॥

तथासति समासस्यैवानुपपत्तेः॥ पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ राजपदपुरुषपदादीनां स

मासवारणाय समर्थपदानामेव समासानुशासनात्। सामर्थ्यस्य निरुक्तैकवाक्यतारूपत्वा

त्। जलपृथिव्योः स्नेहगंधावित्यादितोपि न जले स्नेहः पृथिव्यां गंध इत्याकारकसमूहालंबनो

बोधः। किंतु नहि लक्षणोद्भूतादिनिष्ठैकप्रकारतानिरूपितजलत्वपृथिवीत्वाद्यवच्छिन्नविशे

ष्यतात्मकप्रकारताद्वयनिरूपिताधेयत्वप्रकारतानिरूपितपदद्वयधर्मितावच्छेदकद्वित्वादिनिष्ठै

कप्रकारतानिरूपकस्नेहत्वगंधत्वाद्यवच्छिन्नविशेष्यताद्वयवत्त्वं ज्ञानमिति अतो न कुत्राप्येकवा

कु०वा०
७९

क्यतासंगः। चैत्रो मैत्रश्च गच्छत इत्यादावाख्यातार्थद्वित्वादिप्रकारेणाभासमाने चैत्रमैत्रोभयार्थे गमना
न्वयत्वाद्यन्वयेन निरूढैकवाक्यतालेऽपि समासविधेर्विभाषाधिकारीयत्वादसमासः। ननु द्वि
त्वेऽव्यतासंगः। मित्रद्वित्वनिष्ठप्रकारताद्वयं प्रति योग्यसमूहालंबनबोध इति तु न सम्यक्। तथा
सत्युक्तयुक्त्या एकैकचैत्रमैत्रादितात्पर्येण तथा प्रयोगानुपपत्तेः। आख्यातोपस्थापितद्वि
त्वादिकं चोभयादिरूपान्वयितावच्छेदकावच्छिन्न एवान्वेतीति व्युत्पत्तिः। तेनोक्तप्रयोगदर्शना
त् क्रियापदस्य विशेष्यवाचकपदसमानवचनत्वानियमे विप्रुट् द्वयादितात्पर्येण घटस्तिष्ठत इत्या
द्यो न प्रयोगः। एकवचनान्ते क्रियापदे चैत्राद्यविशेष्यवाचकपदप्रयोग एव साधु अतो घट

एम:
७९

स्तिष्ठतीत्यादौ न प्रयोगः। अथैकघटादिमत्केऽपि देशवृत्तितागृहदशायामत्र घटोऽस्ति घटाः सन्तीति
कथं न प्रयोगः। घटादौ घटत्वादिव्याप्तिविशिष्टपर्याप्तिसंबंधेन द्वित्वादेस्तद्देशवृत्तित्वाश्रयत्वाद्देश्व
सत्वात्। न च द्वित्वेनोपस्थितयोर्द्वयोरेवमत्रापि रेवं वृत्त्युक्तत्वेनोपस्थापितानां पृथक्पृथग्व्यक्तिषु विधेयान्व।
यात् अन्यत्रापि तथैव तद्देशवृत्तित्वाश्रयत्वादिबाधान्न तादृशप्रयोग इति वाच्यं। अत्रापि तथैव योग्यतया ता
दृशविधेयानवगाहि न एकघटे द्वयगाहिनो बोधस्योत्पत्तौ बाधकाभावात्। तथा तात्पर्ये तथा
प्रयोगस्य दुर्वारत्वात्। न च व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकस्तत्र पर्याप्त्यन्वयिताव
च्छेदकपर्याप्तिः तावतामेव पदार्थानामितरेतरान्वय इति व्युत्पत्तिस्त्वन्निर्वाहाय तादृशधर्मावच्छिन्ने

सु॰वा॰
५०

इतरान्वयबोधजनकसामग्र्यास्तथात्वादिविषयकपदार्थान्तरान्वयबुद्धित्वमेवजन्यतावच्छेदकंवक्तव्य।
मितिद्वित्वादिनैकघटादिमात्रविशेष्यकैतद्देशावच्छिन्नाद्यन्वयबोधोनसंभवतीतिनतादृशबोधनात्स्व।
र्येणतादृशप्रयोगापत्तिरितिवाच्यं। योग्यताभ्रमेण। आकाशावच्छिन्न इत्यादिवाक्यात्। द्वित्वादि
ना एकव्यक्तिमात्रविषयकपदार्थान्तरान्वयबोधात्तादृशानुत्पन्नेस्तन्निर्वाहककार्यकारणभा
वस्यचकस्यनासंभवात्। नैवैकमात्रविशेष्यकद्वित्वादिप्रकारकशाब्दबुद्धिमात्रत्वमेवप्रमात्वमुक्तेति
प्रसंगवारणायनिर्वाच्यमितिप्रतीकारसंभवः। तथासतिसंबंधेतद्देश्यतावच्छेदकव्याप्यत्वभा।
नोपगमवैयर्थ्यात्। यावत्ताघटितरसाधारण्येनद्वित्वान्वयस्यएतद्देशावच्छिन्नघटमात्रेएतद्देयाव

रमुः
५०

99

वृत्तित्वस्यवान्वयसंभवेनोक्तप्रयोगप्रामाण्यापत्तेर्वारणसंभवाच्च। यत्तुहेतुतावच्छिन्नोद्देश्यताकवृत्तौ
उद्देश्यतावच्छेदकव्यापकतानियमतोविधेयसंसर्गेभासतेइतिमुरस्वत्तिः। यत्रचोद्देश्यतावच्छेदकवि
शिष्टाधिकरणप्रसिद्ध्यातद्व्यापकत्वमप्रसिद्धं। तथापिखंडशः प्रसिद्धानांतद्धेदकपदार्थानां
विशेष्यविशेषणभावापन्नानांसंभवान्नपौनरुक्त्यंवावत्रेस्मादेनादृशमुत्पत्तिभंगः एवंचएकघट
दिव्यक्तिमात्राधिकरणेपरस्यात्रघटोस्त्वरस्यादिवाक्यस्याप्रामाण्यंस्याद्घटमेवउद्देश्यतावच्छे।
दकीभूतघटमात्रवृत्तिहेतुत्वव्यापकतायास्तादृशवाक्यप्रतिपाद्यायाविधेयसंसर्गेबाधादिति
तदपितुच्छं। अत्रघटोस्त्वरस्यादेहेतुत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य।

भु॰ वा॰
५१

द्वित्ववद्वृत्तिनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्य च तदधिकरणवृत्तिघटत्वनिष्ठाभावप्रतियोगि
तावच्छेदकीभूते तत्तद्विधेयसंसर्गतावच्छेदके बाधात्। घटद्वयाधिकरणपरतादृशवाक्यस्या
प्रामाण्यापत्तेः। तत्तद्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य उक्तविधेयसंस
र्गतावच्छेदके भानोपगमस्तु न संभवति। तत्तद्वित्वेनानुपस्थितेः। न च तदवच्छिन्नस्य संसर्ग
ताभाने तेन रूपेणोपस्थितिर्नापेक्षितेति वाच्यं। तत्संसर्गावच्छिन्नतत्प्रकारतानिरूपिततद्वि
शेष्यताशालिशाब्दबोधपरमित्याकारकतात्पर्यज्ञाने संसर्गस्य विशेषणतया तज्ज्ञाननियो
ज्यसंसर्गघटकार्थोपस्थितेरपि शाब्दबोधात्प्रागावश्यकत्वात्। प्रकृतसंसर्गे नैकपदार्थ।

राम:
५१

विशिष्टापरपदार्थबोधपरपदार्थबोधपरत्वज्ञानस्य महत्त्ववाक्यार्थविषयकतयासंभवेन च पदार्थ।
तात्पर्यज्ञानस्यैव शाब्दधीहेतुत्वोपगमात्। एवं वाक्यार्थघटकसंसर्गस्याननुगमेन अत्र घटोऽस्तीत्या
दौ वाक्यभेदप्रसंगाच्च॥ अत्रोच्यते। व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबुद्धौ स्वव्याप्यतादृश
धर्मवत्त्वमपि विधेयसंसर्गतया भासत इत्युक्तिप्रसक्तिः। व्याप्यत्वं च तदभाववदवृत्तित्वं व्यतिरेकि विधेय
स्थले। तादृशधर्मवत्त्वं उद्देश्यतावच्छेदकताघटकसंबंधेन बोध्यं। अत्र घटोऽस्तीत्यादौ एतद्देशवृत्ति
घानत्वादिरूपविधेयस्य तदभाववृत्तित्वरूपव्याप्तिमदेतद्देशस्थैकघटादिव्यक्तिमात्राधिकरण
लेघटपटादिविशिष्टत्वमेव। घटत्वव्याप्यधर्मोऽपि सरूपोद्देश्यतावच्छेदकताघटकसंबंधावच्छिन्न

सु० वा०
५२

द्वित्वं च घटादौ बाधितमिति तादृशवाक्यस्याप्रमाण्यं। अधिकरणस्य घटद्वयादिमत्त्वे तु घटत्वादिव्याप्यं द्वित्वमेव
तथेति घटत्वादिव्याप्यपर्याप्तिसंबंधेन तद्द्वित्वं घटादावबाधितमिति न तादृशवाक्यस्याप्रामाण्यनिर्वाहः। के
वलान्वयिविधेयकस्थले च द्वित्वाद्यवच्छिन्नव्यापकत्वमेव संस[illegible]र्गे घट
कं। केवलान्वयिनि तादृशव्यापकताया अप्रसक्तत्वात्। ननूक्तद्वित्वावच्छिन्नव्यापकत्वमिति न पू
र्वोक्तदोषावकाशः। घटवानयतीति चैत्रस्यादौ चैत्रकर्तृकानयनकर्मतादिव्याप्यद्वित्वादिमत्त्विष्ट॥
निरूपकतादात्म्यत्वादिसंबंधेन कर्मत्वादौ घटादेरन्वयोऽभ्युपगन्तव्यः तेन चैत्रादावेकघटादिव्यक्तिमा
त्रानयनकर्तृत्वे। न तादृशप्रयोगः। द्वित्वादिमत्त्वं च प्रकारतावच्छेदकीभूतघटत्वादिव्याप्यपर्याप्ति

सु०
५२

संबंधेनबोध्यं ।तेनैवचैत्रस्यपत्नीसहितैकघटादिव्यक्त्यानयनकर्तृत्वेपि नतादृशप्रयोगः ।। एवमत्रा
प्यूहनीयं। यत्रानेकवृत्तिधर्मो गृहीत्वान्वयितावच्छेदकतयाभासते तत्रोभयादिनैवसमं पृष्ठार्थांतरान्वयः
।यत्रैकमात्रवृत्तिस्तथात्वेत्रैकेनापीतिव्युत्पत्तिभेदावलंबनात् कार्यकारणभावेवैचित्र्यात्सर्वंसमंजस
मित्यपिवदंति। अथघटादिव्यक्तिभेदेनानयनकर्मताभिन्नभिन्नैवेतिप्रतिबंधात् नस्यपुंसोघटनवा।
नयतीतिवाक्यात् ।शाब्दबोधानुपपत्तिः।।तस्यकर्मतात्वावच्छेदेनाधेयत्वासंसर्गावच्छिन्नप्रतियो
गिताकस्य गृहीत्वाद्यवच्छिन्नाभाववत्ताज्ञानमुभयत्वावच्छिन्ननिरूपिताधेयत्वासंसर्गावगाहित्वा
नमेवप्रतिबध्नातिनतुकेवलंविशेष्यविशेषणत्वेनेतिरीत्याज्ञायमानमुभयत्वादिनाउभयादिविशि

ष्टत्वात्। अतो विशेषदर्शिनां तादृशवाक्याधेयत्वांशे उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहिभ्रमात्मक।
बोधं न भवत्येव अपितु तद्देशे तदनवगाहि प्रमात्मकं ज्ञानमिति। उभयत्वाद्यवच्छिन्ननिरूपिताधेयत्वे च उभ
यादिवृत्तावेकस्मिन् धर्मे एव नतु प्रत्येकमात्रवृत्ताविति कर्मत्वांशे तादृशाधेयत्वावगाहिज्ञानस्य प्र
मात्वमित्यवधेयं संख्यास्थलमल्लस्य पर्याप्त्यवच्छेदकगता। क्वचित् प्रतीयते। यथा सेपञ्चौ व्रीहियवाविंशा
द्वौ। एकत्वं भागे वाभिहितं। विरुद्धसंख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्यावसंख्या
पर्याप्त्यवच्छेदकसंख्यायामेवान्वेति। यथा शतमेकं द्वे शते त्रीणि शतानीत्यत्र शतत्वादावेक।
त्वद्वित्वबहुत्वानामन्वयः। अतएव चैकशतद्विशततासमर्थेऽपि न शतानीति प्रयोगः। तत्र पर्याप्त्यर्थस्य शतस्य

बहुत्वान्वययोग्यत्वेपि प्रकृत्यर्थतावच्छेदकशतत्वांशे बहुत्वान्वये एव बहुवचनस्य साकांक्षत्वान्न च।
न्वयोग्यताविरहात्। नैवं चैकशतेपि नानापुरुषीयापेक्षाबुद्धिजन्यतानानाशतत्वसंभवात् एकशतनिष्ठश
तत्वेपि बहुत्वान्वययोग्यताऽक्षतैवेति वाच्यं। परस्परसाधिकरण्यरूपायास्ति बहुत्वस्यैव शतादिपदो।
त्तरबहुवचनार्थत्वात्। नादृशबहुत्वस्य च एकशतादिवृत्तितानानाशतत्वादेर्बाधात्। अयं वा तत्रापि।
बहुत्वमेव बहुवचनार्थः परस्परसमानाधिकरणवृत्तिरूपा पर्याप्तिरेवाकांक्षानिरूपकः संबंधः। बहु
द्वे शतेत्रीणि शतानीत्यादौ संख्येव शतादिशब्दार्थः न तु संख्येयं संख्येयस्य तदर्थत्वे विंशत्याद्याः स।
दैकत्वे सर्वाः संख्येयसंख्ययोरित्यनुशासनविरोधात् द्विवचनादिसाधुतानुपपत्तेः। गवां शतानीत्यादौ

कृ.वा०
५४

षष्ठ्यर्थान्वयानुपपत्तेश्च। नचाभेदः षष्ठ्यर्थः। तथासतिब्राह्मणस्यत्वत्राप्यन्नोदोषोऽपिस्यात्
। अस्माकंचादरणतः। संख्याः संख्येयेवर्त्तन्ते। अतः परंसंख्यानेसंख्येयेचेत्यनुशासनात् दशादिशब्दा
नां शतादिशब्दवत्। संख्यानर्थकत्वाभावाद्शतत्वादिसंख्यायाः पदार्थतावच्छेदकत्वेनतत्रषष्ठ्य
र्थसंबंधान्वयासंभवेननतथाप्रयोगइति। तदसत्। गवांशतानीत्यादौ संख्यायाः प्राधान्येनशता
दिशब्दवाच्यत्वेगवांशतंदद्यादित्यादौशतानिपदार्थस्यसंख्यायादानादिकर्मत्वान्वयायोग्यतया
प्रामाण्यानुपपत्तिः। गवांशतेऽप्युक्तमित्यादौसंख्यायांप्युक्तधमेदान्वययोग्यताविरहाच्च
नुपपत्तिश्च तस्माद्दशादिशब्दाइवशतादिशब्दा अपिसंख्यावच्छिन्नवाचका एव। धर्मिविशेष

शप:
५४

107

त्वात्र संख्यावाचकोर्थैकदेशेपि संख्यायां स्वप्रकृतिकविभक्त्यर्थसंख्यायाः साकांक्षत्वात् प्रथमप्रकृति
कषष्ठ्यर्थसंबंधान्वयसाकांक्षत्वाच्च तेषां संख्यानार्थकता प्रवादः न तु दशादिशब्दानां तथात्वं। इत्यादि
त्रात्वत्वतात्पर्येण त्रात्वत्वानां दशोत्तरा[illegible]प्रयोगविरहादिति तेषां संख्येयमात्रवाचिता प्रवाद इति। एक
द्विबहुशब्दोत्तरैकवचनद्विवचनानि च न संख्याबोधकानि उद्देश्यतावच्छेदकविधेययोरैक्येन एकत्वा
न्वये आकांक्षाविरहादिति तदुत्तरं प्रथमाविभक्तिः प्रयोगसाधुतामात्राय। नित्यबहुवचनांतानां वा
दिशब्दपरं प्रथमाबहुवचनमपि कश्चिन्निरर्थकमेव पदत्वे कल्प्यते मात्रतात्पर्येण त्वादृशाप्राः
प्रयुज्यते। तत्र बहुत्वान्वये योग्यताविरहात्। यत्तु तत्र गुणादिसाधारणबहुत्वस्य तत्रान्वय इति॥

मु०वा०
५५

नत्रशोभने। महत्त्वस्यार्थतावच्छेदकस्याप्यवयवावच्छिन्नसंबंधेनैवानेकसंख्यान्वयस्य युक्तत्वात्तयातादृशसंबं [illegible]
धेनतथाविधबहुत्वा [illegible] न्वयेयोग्यताविरहात्। अन्यथाउदासीनघटपटा
दिसाधारणबहुत्वस्याप्यन्वयसंभवेनतद्गतगुणादिसाधारणबहुत्वानुधावनस्याकिंचित्करत्वा
त्। अथअजहत्स्वार्थलक्षणयागुणादिसाधारणधर्मावच्छिन्नमेवमहत्त्वस्यार्थ इतिचेत् तर्हिबहुत्वेन
भासमानेषुगुणादिष्वपिपदार्थांतरान्वयःस्यात्। तथाच आपोऽस्मानितिवत्अत्रगृहेसंतीत्यादि॥
वाक्यानामप्रमाणतापत्तिः। गुणादिषुदृश्यमानेदृष्टहस्तित्वादेर्बोधात्। मुख्यार्थमात्रपरतादृश।
शब्दानांबहुवचनांतानुपपत्तेश्चेतिनकिंचिदेतत्। अत्रादिपदार्थेसकलबहुत्वान्वययोग्यतासत्वे।

५५

प्यसाधुत्वादेव तद्धनमेकवचनेन प्रयुज्यते इति ध्येयं। आख्यातैकवचनस्य संख्यार्थत्वेऽपि विवरणे निष्कर्षा
नुसारित्वम्। घटोस्तीत्यादौ सुबेकवचनादेव संख्याबोधसंभवात्। चैत्रेण दृष्टो घट इत्यादिस्थलानु
रोधेन तस्य तद्बोधकताया आवश्यकत्वात्। नैवैकवचनत्वेन अनुगतेन तिङ्। कथं च तस्यापि एकत्वबो
धकत्वमस्तु तमपि तिवाद्यम्। एकवचनत्वस्यैकत्वशक्ततावच्छेदकतायाः प्रागेव निराकृतत्वात्। अस्तु
वा तेन रूपेण तिङः कवचनस्यापि एकत्वे शक्तिः तथापि तज्ज्ञानस्यैकत्वोपस्थितेर्न तच्छाब्दबोधहेतु
तासंभवति। तथा सत्यैकत्वागृहीतस्तपदवृत्तिकस्य पुंसः स्तपदमहिम्ना निपातोपपदादिपदोत्तर।।
अपादिपदोपस्थाप्यैकत्वान्वयबोधप्रसंगः। किंतु स्तपदत्वादिप्रकारकज्ञानजन्यतदुपस्थिति।

मु० षा०
५६

त्वादिनैव। तथासन्निधयादिघटितोनेकपदत्वादिरूपानुपूर्वीविशेषात्मकआकांक्षाज्ञानघटितायोग्यताज्ञा
वैकल्यान्वयबोधसामग्र्याएकपदत्वादिप्रकारकधीजन्योपस्थितेरेवान्तर्भावेलनादेशापत्तेरनवकाशा
त्। एवंचतिबादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेननशाब्दबोधहेतुत्वेमानाभावइति चेत्तिबा
देः संख्यानभिधायकत्वेचैत्रः पचतितंडुलंचैत्रेणपच्यतेतंडुलइत्यादौकर्तृकर्मवाचकपदात् तृती
याद्वितीययोरापत्तिः। कर्तृकर्मसंख्याया अनभिधानेकर्तृकरणयोस्तृतीयेतिकर्मणिद्वितीयेति
सूत्राभ्यांतयोरनुशासनात्। नैयायिकमतेलकारस्यकर्तृकर्मावाचकतयातदुत्तरं तस्यतृतीयाद्वि
तीयानियामकत्वासंभवात्। नचकर्त्रादिगतसंख्यानभिधानमेवकर्त्रादिवाचकपदोत्तरतृतीयादि

रा० म०
५६

111

नियामके चैत्रेण पच्यते तंडुलमित्यादिस्थले पिलकारस्य चैत्रादिगतसंख्याभिधायकत्वात् एकत्वत्वादिनाऽ
कत्वसामान्यस्यैवैकवचनाद्युपस्थितेर्युक्तत्वादिति वाच्यं। युक्तस्तु तत्संख्यानभिधायकत्वे प्रसक्ते। नु नत्तु तत्संख्या
निरूढत्वनिरूपकत्वे अपि तु तद्विशेष्यकसंख्याप्रकारकशाब्दबोधानुकूलत्वमेव। तथा च कर्त्रादि
विशेष्यकसंख्या[illegible]न्वयबोधाजनकत्वकारकादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयाद्यो भवे
नीमत्र तदनुशासनतात्पर्यं। चैत्रेण पच्यते इत्यादौ चैत्रादिविशेष्यकसंख्यान्वयबोधकत्वेनाख्या॥
तस्य। आख्यातार्थभावनायां यत्रान्वयस्तद्विशेष्यकसंख्याबोधस्यैवाख्यातेन जननात्। तादृश
भावनान्वयबोधविशेष्यश्च प्रथमान्तपदोपस्थाप्य एव। चैत्रः पचति तंडुलमित्यादौ चैत्रादिः साक्षा

सु॰वा॰
५७

देवभावनाविशेष्यत्वं चैत्रे रूपश्चेतेतंडुलत्वमात्रेपरंपरया। चैत्रत्वनिष्ठभावनाजन्यफलशालीतंडुलत्वाकार
कबोधस्यतत्रोदयात्। तस्मात्तिबादेरपिसंख्याबोधकत्वमावश्यकं इति। तत्रविचार्यते। तथाहि। क
र्त्रादिनिष्ठसंख्यान्वयबोधा[illegible]ननुकूलत्वे यदितादृशबोधोपधायकज्ञानविषयत्वाभाववत्त्वं तद्दा।
यादृशतिबादिज्ञानेनसहकार्यं नत्विरहात्तादृशबोधोनाजनितइयोगेत्ततीयाद्यापत्तेः। यदिच
तादृशबोधे। स्वरूपयोग्यज्ञानविषयत्वाभाववत्त्वंतदासमभिव्याहृतात्मनेपदादिज्ञानस्यापितादृश।
बोधस्वरूपयोग्यत्वात् स्वरूपयोग्यज्ञानाविषयाख्यातस्यैवाप्रसिद्धेः। अथकर्त्रादिविशेष्यकसंख्या
न्वयबुद्धित्वावच्छिन्नजन्यतानिरूपित। जनकतावच्छेदकविषयिता। निरूपकत्वमेवतादृशबोधा

रघुः
५७

113.

ननुकूलत्वं। चैत्रः पचतीत्यादिवाक्यघटकतिवादिविषयितांचैत्रादिविशेष्यकसंख्यान्वयवुद्धित्वावच्छिन्न

जनकतावच्छेदिकातादृशीनपुनर्बुद्धित्वावच्छिन्नंप्रतिचैत्रादिपदसमभिव्याहृततिवादिपदज्ञानत्वेनाको

क्षाज्ञानस्यहेतुत्वात्। चैत्रेणपच्यतेतंडुलइत्यादिवाक्यघटकतादिपदविषयिताचनतादृशी। चै

त्रादिसमभिव्याहृततादृशज्ञानत्वेनतादृशान्वयवुद्धित्वावच्छिन्नंप्रतिहेतुत्वात्। नचचैत्रः पच्यतेइत्या

वि दौचैत्रविशेष्यकाख्यातार्थसंख्यान्वयबोधोत्पत्त्यांचैत्रसमभिव्याहृततादिपदज्ञानत्वेनापितादृशान्वयवु

द्धित्वावच्छिन्नहेतुताक्षतेवेति चैत्रेणपच्यतेइत्यादिवाक्यघटकीभूततादिपदविषयितापितादृ

श्येवेतिवाच्यं। चैत्रेणपच्यतेचैत्रः पच्यतेइत्यादिवाक्यात् चैत्रादिविशेष्यकस्य। भावनायाः सं ॥

अ॰ वा॰
५७

ख्यायाश्चान्वयबोधस्यानुदयात्। तद्विशेष्यकतदुभयान्वयबोधे प्रथमांतचैत्रादिपदसमभिव्याहृतशब्दादि
विकरणोत्तरतत्तदाख्यातपदज्ञानत्वेन हेतुत्वात्। चैत्रेण पच्यते तंडुल इत्यादिवाक्यघटकनाहीनां ताहृश
समभिव्याहारादिभूतत्वनयाताद्विषयिताया अनाहृतत्वात्। चैत्र पक्ष्यते इत्यादितः तंडुलः पक्ष्यते इत्या
दितश्चैत्रतंडुलविशेष्यकसंख्यान्वयबोधोत्पत्त्योः चैत्रः पक्ष्यते तंडुल इत्यत्र उभयविशेष्यकसंख्यान्वयबो
धोपयिकसमभिव्याहारज्ञानविषयितायाः तइत्यादौ सत्वेन कर्तृकर्मणोस्त्रीयाद्वितीययोरप्रस।
क्तावपि न ताहृशवाक्यमुत्पन्नाः प्रयुंजते। कर्तरि साक्षात्कर्मणि च दृष्टितपरंपरया युगपत्भावनाविशे
षणकान्वयबोधजनकतायाः आख्यातस्याव्युत्पन्नतया नाहृशवाक्यादुभयविशेष्यकान्वयबोधासंभ

ए॰
५८

वात्। नचाकांक्षायोग्यतादिसत्वात् कथं न तादृशान्वयबोध इति वाच्यं। अगत्या एकविधान्वयबोधे अन्यवि
धान्वयबोधसामग्र्याः सत्वात् घटकतात्पर्यज्ञानस्य बाधप्रतिबंधोपगमात् न च तंडुलः पच्यते चैत्रेण तंडुलं प।
च्यते चैत्र इत्यादिवाक्यद्वयविषयकसमूहालंबनदशायामपि उभयविधान्वयबोधानुपपत्तिरिति वा
च्यं। तादृशैकविधान्वयबोधे तादृशान्यविधान्वयबोधप्रतिबंधकत्वेनाभ्युपगमात् तथाविधाख्यातधर्मिकप्रत्य
तान्वयबोधपरत्वज्ञानस्य हेतुतया चैत्रः पच्यते तंडुल इत्यादिवाक्यानां द्विविधान्वयबोधवारण
स्य। दर्शितवाक्यद्वयप्रतिपादनस्यैव शक्यत्वात्। न च निरुक्तसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वे
चैत्रेण स्वेदः पच्यते चैत्रः स्वे पचनीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कर्त्रादिविशेष्यकान्वयबोधोप

अ०पा०
५६

पिकाकांक्षास्तानीयविषयित्वनिरूपकत्वस्यतत्राख्यातेसत्वादितिवाच्यं कर्त्रादिपरपसराख्यातपदयोः समभि
व्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयतानिरूपकत्वस्य दोत्तरं तृतीयादिविभक्तिरित्येवनिय
मोपगमेनप्रथमस्थलेचैत्रपरस्वपदाख्यातपदयोर्द्वितीयेचननत् परचैत्रपदाख्यातपदयोः समभिव्याहा
रस्यैवतद्विशेष्यकसंख्यान्वयबोधप्रयोजकतयाक्रमेणचैत्रपदस्वपदाभ्यांतृतीयाद्वितीययोरनुपप
सनवकाशादितिचेन्न। अनभिहितेइत्यधिकारेकर्तृकर्मणोस्तृतीयानुशासनस्य किंप्रयोगमभि।
तिकर्तव्यं। चैत्रः पचतितंडुलः पच्यतेइत्यादौचैत्रतंडुलपदाभ्यांतृतीयाद्वितीययोरप्रयोगइतिचेत्।
तत् किंमणिमेत्रोदिमायेननादृशानुशासनस्यतथाविधप्रयोगविरोधिज्ञापेननतदभावस्तत्पु

राम:
५६

रुः। स्यान् नैवं चैवंसे भवति। पचति पक्कं तेन इत्यादि क्रियायोगे कर्तृकर्मवाचकपदानंतरं तृतीयाद्वितीययोः।
साधुत्वस्य तत्कर्तृत्वतत्कर्मत्वादिबोधोपायेकाकांक्षारहितत्वादिरूपस्य प्रतिपत्तिः प्रयोजनं तस्येति चेन्न
हि उक्तनियमपरतया पिनतनस्तल्लाभः प्रथमांतैचैत्रतंडुलादिपदतत्तदाख्यातपदयोः समभिव्याहा
रस्यैव चैत्रतंडुलादिविशेष्यकतत्तदाख्यातार्थंतेखान्वयबोधप्रयोजकतया चैत्रेण पचति तंडुलै पच
तेइत्यादिवाक्यघटकचैत्रतंडुलादिपदतृत्तिवादिपदयोः समभिव्याहारस्यानथात्वेन तद्घटकतृती
याद्वितीययोः साधुत्वस्योक्तनियमाव्यवच्छेद्यत्वात्। तस्मात् मुख्यभाक्तसाधारणकर्तृत्वकर्मत्वयोः
कर्तृकर्मकवाचकपदसमभिव्याहृतलकृतस्थितसमासेरनभिधानमेवतृतीयाद्वितीयादिनियामकं।

मु०वा०
६०

शिरोमणिभिरत्रैव निर्भरो विहितः। लादीनां तदनभिधायकत्वे च तत्तद्वाचकत्वं तन्निष्ठत्वनिरूपक।
त्वं वा। आख्यातसामान्यस्यापि आख्यातत्वेन तत्त्वादिना वा कर्तृत्वादिनिष्ठशक्तिलक्षणानिरूपक-
त्वात् कर्तृत्वानभिधायिकाख्यातस्यैवाप्रसिद्धेः। न तु शाब्दबोधोपयिकाकांक्षाभावत्वमेव तत्तत्।
चैत्रेण पच्यते तण्डुल इत्यादावाख्यातस्य कर्तृत्वादिवाचकत्वेपि तच्छाब्दबोधप्रयोजकाकांक्षाया
हि सत्त्वात्सत्त्वमेव। चैत्रादिपदोत्तरतृतीयायैव कर्तृत्वादिबोधनसंभवात् तत्तादृशाकांक्षाया अ-
कल्पनादित्यपि न। चैत्रेण पक्ष्यत इत्यादौ तृतीयानुपपत्तेः। पक्ष्यते चैत्र इत्यत्र चैत्रादौ पाककर्तृत्वे।के
वलात् पक्ष्यत इत्यादि तत्र मुख्यविशेष्यतया तस्या बोधात् तादृशाख्यातघटितानुपूर्वीविशेषस्य

एप०
६०

पाकांक्षायाः हृतिबोधौपयिकत्वात्। नवसमभिव्याहाररूपाकांक्षैव विवक्षणीया प्रकृते प्रकृतिप्रत्यययोः
आनुपूर्वी आकांक्षा न तु समभिव्याहार इति नोक्तदोष इति वाच्यं। तथासति चैत्रेण पचतीत्यादावपि
तृतीयायाः साधुतापत्तेः। तादृशचैत्रपदाख्यातपदयोः समभिव्याहारस्य हृतिबोधानौपयिकत्वात्।
चैत्रेण विजेष्यते मैत्र इत्यादौ तृतीयानुपपत्तेश्च विजेष्यते मैत्रः इत्यादितः हृतिबोधानादृशाख्यातमैत्र
पदयोः। समभिव्याहारस्य हृतिबोधौपयिकत्वात्। किंतु तत्तात्पर्य्यस्थत्वमेव। तथा च चैत्रेण पक्ष्य
त इत्यादौ आख्यातस्य कर्तृत्वादितात्पर्यकत्वे तृतीयाः साधुरेव। चैत्रेण पचतीत्यादौ आख्यातस्यार्थ्य
विवक्षायां तृतीयायाः साधुत्वेपि परस्मैपदस्यासाधुत्वान्न प्रयोगः परस्मैपदस्यासाधुत्वं च धा

व्यु० वा०
६९

त्वर्थे विशेष्यस्य मम येन विवक्षणे भावकर्मणोरिति सूत्रेणात्मनेपदनियमात्। आख्यातार्थाविवक्षा
यां नैव चैत्रेण पचते इत्यादि प्रयोगः। शबादि विकरणस्यासाधुत्वात्। कर्तृत्वतात्पर्यकसार्वधातुकयोगए
व तत्साधुत्वात्। कर्तृत्वकर्मत्वोभयतात्पर्येण चैत्रः पच्यते तंडुल इत्यादृयस्तु न प्रयोगाः। तदेकतरत्वो
धे। अन्यपरत्वेनागृह्यमाणत्वात धर्मिकमहत्तान्वयबोधपरत्वज्ञानस्य हेतुत्वात्। चैत्रेण पच्यते तं
डुल इत्यादौ कर्तृत्वादावाख्यातस्य तात्पर्यग्रहे कर्मत्वाद्यन्वयबोधोपि न भवत्येव। अथ पक्का निर्भुक्ते
चैत्रः ओदनः पक्को भुज्यते इत्यादौ क्त्वाकर्मणः कर्तृकर्मत्वानभिधानाच्चैत्रपदौदनपदाभ्यां न तृ
तीयाद्वितीये कथं न स्यातां। न च क्त्वानभिधानेपि आख्यातेन तदभिधानात्तत्राभिहितत्वे। समभिव्याहृ

एम०
६९

नपदाभिहितत्वसामान्याभावस्यैवानभिहितपदेन विवक्षणात्। समभिव्याहृतेति करणे चैत्रेण गम्यते ग्रा
मस्तं मैत्रो गच्छतीत्यादौ न तृतीयाद्वितीययोरनुपपत्तिः। गच्छतिगम्यतेरित्यादौ आख्यातस्य नतत्पदासम
भिव्याहृतत्वादिति वाच्यं। तथा सति भुंजानेन चैत्रेण पच्यते भोक्ष्यमोदनं पचतीत्यादौ तृतीयाद्विती
ययोरनुपपत्तिः। कृताकर्तृत्वकर्मत्वयोरभिधानात्। कृतानत्रभोजनकर्तृत्वतत्कर्मत्वयोरभिधानेपि पा
ककर्तृत्वतत्कर्मत्वेवानभिहितमिति चेन्न हिंसकृतेपि तदनभिहितमेव। नच प्रधानक्रियानिरूपितकर्तृ
त्वाद्यनभिधाने तृतीयादेः साधुत्वेति तदुक्तं प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशत इति।
शक्तिः कर्तृत्वादिरिति वाच्यं। तथापि चैत्रेण दृश्यमान घटं मैत्रः पश्यतीत्यादौ स्वानभेदेन विषयताभे

दाभावात् चैत्रदर्शनमैत्रदर्शनोभयनिरूपितविषयत्वरूपकर्मतायाः तेनाभिधानात् द्वितीयानुपपत्ति
रिति चेन्न तत्तत्प्रातिपदिकार्थविशेषणत्वमात्रेणस्य कर्मत्वकर्तृत्वाद्युविवक्षाया एवं तदनभिधानव।
र्थत्वात्। न तत्तत्प्रातिपदिकार्थविशेष्यत्वघटककर्मत्वकर्तृत्वादिविवक्षायां द्वितीयादिविभक्तेः सा
धुत्वमित्यर्थेतास्यपि स्यन्तस्यैव सिनत्वात्। शेषमाख्यातार्थविचारे विवेचयिष्यत इत्यलमत्राधिक्ये
न। आख्यातद्विवचनबहुवचनयोरेकसंख्याबोधकत्वमावश्यकं। चैत्रो मैत्रश्च गच्छतः चैत्रो मैत्रो
देवदत्तश्च गच्छन्तीत्यादौ चेन्द्रकलेकः सुजनेदरिद्रता विकाशलक्ष्मीः कमलेषु चेवला। मुखामसा
दः सधनेषु सर्वदा यशो विधातुः कण्येति खेडिनमित्यादौ च द्वित्वबहुत्वबोधकसुपोभावात्। नच

तत्र सुबेकवचनस्यैव द्वित्वबहुत्वादेर्लक्षणयास्त्विति निवार्यं। आनुशासनिकातिरिक्तार्थेषु सुब्विभक्तेर्लक्ष
णाद्या अनभ्युपगमात्। अन्यथा चैत्रो मैत्रश्च गच्छत इत्यादावपि बहुदासिलक्षणयैव स्वादिना द्वि
त्वादिबोधनसंभवात्। औजसादिरूपादेशिस्मृतिद्वारा द्विविधबोधनिर्वाहे बहुदासिसुपां स्वौजसमा
दिसूत्रेण औजसादिस्थाने स्वाद्यादेशस्यैवेष्टार्थत्वात्। चैत्रादिपदोत्तरैकवचनस्य द्वित्वादिलाक्ष।
णिकत्वेन रपदस्य स्वार्थमैत्रादिसाधारणद्वित्वादिबोधे च उक्तमुपपत्तिविरोधेनानुपपत्तिश्च। आख्या
तार्थसंख्यान्वयबोधे च समानविशेष्यकत्वं दृष्टं भावनान्वयबुद्धिसामग्री अपेक्षिता। भावनाया बाधादि
ग्रहकाले तत्र नास्त्येव भूतु काले वाऽन्यस्थले द्वित्वाद्यन्वयावबोधात् भावनाया अविशेष्ये धात्वर्था दौ सं।

मु० वा०
६३

ख्यान्वयावबोधाच्च। तादृशसामग्र्याः संख्यान्वयबुद्धित्वावच्छिन्नं प्रतिख्यातं अन्येन हेतुना तदकल्पनेऽपि भा
ख्यातमत्र संख्योपस्थितिनियोक्ततादृशज्ञानविशेषादिघटितसामग्र्या भावेनान्वयग्राहिसंख्यान्वयबोधस्य क
दाप्यजननात्। संख्यान्वयबोधसाधारणभावेनान्वयबोधत्वावच्छिन्नं हेतूनामपि तादृशसामग्री घटकत्वे
नापुनसंभावात्। नचैतादृशकारणेनेत्यन्वयबुद्धित्वे संख्यान्वयबुद्धित्वे वाजन्यतावच्छेदकमुपेयते
इत्यत्र विनिगमनाविरहः। संख्यामविषयीकृत्यापि भावेनान्वयबोधस्यानुभवसिद्धत्वात्। द्वितीयस्य।
जन्यतावच्छेदकत्वासंभवादिति दिक्। नचनत्र स्वाश्रयसमवेतत्वादिसंबंधेन स्वगते द्वित्वादिकमे
वभासत इति वाच्यं। एकत्वज्ञानेऽपि तादृशसंबंधेन द्वित्वादेः परिसमाप्तपारकमात्रतात्पर्येणापि द्वि

एमः
६३

125

वचनाद्यापत्तिरिति चेत्। अपेक्षाबुद्धिविषयत्वमेव तदुत्तरद्वित्ववचनादिना बोध्यते। नन्वेकमात्रवृत्तिध
र्मस्य महत्त्वपर्याप्त्यनवच्छेदकत्वस्य ले महत्त्वपर्याप्त्यनवच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबंधेन महत्त्वस्यैवान्वे
ति अयमत्र शुद्धपर्याप्तिसंबंधेनेति न द्वित्वादिस्थले दोष इति। कर्मणि द्वितीयेत्यनुशासनात्। कर्म
त्वं द्वितीयार्थः। तत्र कर्मपदस्य धर्मपरत्वात्। स सम्यावाचकतार्थत्वात्। कर्मत्वञ्च न तथात्वं कर्मत्विना
पार्थस्याभावादेरभेदान्वयसंभवे विधात्वर्थगमनादिना तदन्वयासंभवात्। गौरवाच्च। कर्मत्वं चक्रि
याजन्यफलशालित्वं। तत्र च क्रियाधात्वर्थ एव लभ्यते जन्यजनकभावस्य विनैव पदार्थत्वे संसर्गम
र्यादया भानेसंभवतीति फलमात्रे कर्मप्रत्ययार्थः। तत्र संयोगविभागरूपफलस्यापि धातुलभ्यमेव

व्यु० वा०
६४

गमिसजिप्रभृतीनां तदवच्छिन्नस्पंदादिरूपव्यापारवाचित्वादिति वाच्यं। व्यापारमात्रस्य धात्वर्थत्वात्। फ
लविशेषान्वयबोधे च धातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया। ग्रामं त्यजतीत्यादौ धात्वर्थस्पंदे देशा
मनिष्ठविभागजनकत्वमेव। ग्रामं गच्छतीत्यादौ तु धात्वर्थस्पंदे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते।
न तु विपरीतं। ग्रामं गच्छतीत्यादिवच्च ग्रामं स्पंदते इत्यादयो न प्रयोगाः। द्वितीयादेर्व्याप्युपस्थापि।
तस्पंदादेरेव फलान्वयबोधकत्वात्। स्पंदिप्रभृत्युपस्थापिते तस्मिन् द्वितीयादिना फलान्वयबोधजन
नासंभवात्। स्पंदिप्रभृत्युपस्थापिते तस्मिन् द्वितीयादिना फलान्वयबोधजननासंभवात्। न हि येन
केनचिदुपस्थापितयोरेवार्थयोः परस्परमन्वयः प्रतीयते। तथा सति घटकर्मत्वादिवद्वोपस्थापितयो

रामः
६४

रपि घटकमित्याद्यो: परस्परमन्वयबोधप्रसंगात्। कृञादिसमानार्थकधातूपस्थाप्यप्रतले विषयितार्थक
द्वितीयार्थान्वयसंभवेन घटं करोतीतिवत् घटं यतते इत्यादिप्रयोगप्रसंगाच्च। अपितु यत्पदोत्तरार्थान्वयबो
धे आकांक्षा तदुपस्थाप्ययोरेव तादृशान्वयबोधः। आकांक्षा च द्वितीयादेर्गम्यादिना कृञादिना वक
ल्प्यते। नतु तत्समानार्थकेनापि स्पंदतिप्रभृतिनेति। न चाकांक्षा च समभिव्याहारस्यैव फलत्वलाद्न्व
यबोधोपयिकत्वमुपगम्यते नतु स्पंदि प्रभृति समभिव्याहारस्येति न तस्याकांक्षात्वम्। अन्वयबोधौपयि
कसमभिव्याहारस्यैव तथात्वात् अत एव समानार्थकत्वेपि गम्यादेरिव न स्पंदादेः सकर्मकत्वव्यवहारः।
। फलान्वितव्यापारबोधकधातुकत्वस्यैव तन्नियामकत्वात्। अप्यधातोर्व्यापारमात्रवाचित्वेस्पजति

मु० बा०
६५

गच्छन्तीत्यागोगमनमित्यादिवाक्यादविलक्षणबोधप्रसंगः। नचशक्तिग्राहकमयोस्तादृशवाक्यजन्यबो
धयोर्वैलक्षण्यं कश्चिदप्यपेक्षते तथासतिसागमादितात्पर्येणागमनादिपदयुक्तवाक्या अपिप्रयुञ्जीरन्
। नचतत्रफलविशेषावच्छिन्नव्यापारेलक्षणास्वीक्रियत इतिविलक्षणबोधोपपत्तिरितिवाच्यं। ल
क्षणयाविलक्षणबोधजननेऽपि शक्त्या अविलक्षणबोधजननसंभवेन दर्शितातिप्रसंगस्य दुर्वारत्वात्
। नचगम्यादिपदात्कर्तृत्वानजमार्थोपस्थित्या फलविषयकान्वयबोधस्य कुत्राप्यजननात् तादृशोप।
स्थितिघटितसामग्रीशरीरे फलविशेषबोधकसामग्री निवेश्यते तथा च सागमनादिपदयोः शक्त्या
नाविलक्षणबोधजनकतेतिवाच्यं। सजिगम्योरेकार्थवाचकतारूपपर्यायतांविषयीस्यतोगमनादिप

एम:
६५

दात् त्यागादिपदजन्यबोधसमानाकारकबोधस्य सर्वानुभवसिद्धत्वाद्गम्यादिशक्तिज्ञानात् फलावि
षयकोबोधस्यापि प्रसिद्धेः एवं तादृशस्य पुंसो ग्रामं गच्छति ग्रामं त्यजति इत्यादितोऽप्यविलक्षणबोधो
द्यात् फलविशेषबोधकसामग्र्याः गम्यादिपदजन्यबोधनियामकताया वक्तुमशक्यत्वात्। तथाचा
म्नातस्यापि भवन्मते ततोऽविलक्षणबोधसंभवेन एकविधबोधतात्पर्येणाभ्युत्पन्नानां तादृशप्रयोगप्र
संगो दुर्वार इति चेत् मैवं। कर्मप्रत्ययासमभिव्याहृते त्यागगमनादिपदस्य न तत्फलावच्छिन्नव्यापारेणा
दिनातात्पर्यं कल्प्यते ननु केवलव्यापारे। अनादितात्पर्यमेव च स्वारसिकप्रयोगनियामकमिति एकार्थता
त्पर्येण न प्रामाणिकानां त्यागगमनादिप्रयोगः एवं सन्निगमिप्रभृति समभिव्याहृतकर्मप्रत्ययस्य फ

लविशेषएवनियतेनतादृशेतात्पर्येमितिनविभागादेतात्पर्येणग्रामंगच्छतीत्यादिप्रयोगः तदर्थबोध
कत्वमात्रेतुनतदर्थेतात्पर्येणस्वारसिकप्रयोगनियामकत्वमस्तिशक्तिभ्रमादिनाघटपदस्यापिपटा।
दिबोधकत्वयावतेऽपिघटादिपदप्रयोगापत्तेः। नापिशक्त्यावोधकत्वेनतथा। निरूढलक्षणयापिस्वा
रसिकपदप्रयोगात्। शक्तिभ्रमेलक्षणज्ञानेचोनरेणगम्यादेर्विभागादिरूपफलविशेषितस्वेद्रा
दिबोधकत्वाभावनियमोसिद्धएवेति तात्पर्यभ्रमसहकृतशक्तिभ्रमयातादृशबोधजननेपिन
क्षतिः विनालक्षणाग्रहंभ्रमानधीनतादृशबोधोगमिप्रसक्तितोनसंभवतीत्येवनियमः।सव
तात्पर्यभ्रमेऽऐवनिर्वेदृतिविभागाद्यर्थपूर्वपूर्वैर्वामनादितात्पर्यभ्रमवतोवक्तुः स्वकीयतात्प।

थेएग्रामंगच्छतीत्यादिप्रयोगोपपत्तेः तत्र श्रोतुस्तात्पर्यभ्रमासंभवेऽपि वक्तृतात्पर्याभावादित्वभ्रमएवप्रयोगसे
पादनद्वारेणतदर्थशाब्दबोधप्रयोजकइतिनतादृशनियामकस्येति दिति प्राचीनपथपरिष्कारप्रकारः॥
नव्यास्तुसंयोगादिरूपफलविशेषावच्छिन्नस्पंदो गम्याद्यर्थः न तु द्वित्वयेतावच्छेदकफलशालित्वमेवत
द्वितुकर्मत्वं न अतो गम्यादिकर्मत्वस्य पूर्वदेशादेः प्रसंगः न वा स्पंदेऽपि सकर्मत्वं । तत्र फलस्य धात्वर्थता
नवच्छेदकत्वात् । एवं च धात्वोरेव फलविशेषलाभात् । फलान्वयिनीत्वविरेव द्वितीयार्थः । न च कर्म
णि द्वितीयेत्यनुशासनविरोधः । तस्य कर्मणिफलनिष्ठाधेयत्वान्वयिनि प्रत्ययेति तात्पर्ये न तु द्वितीयेरे द्विती
येसार्थकत्वात् । न चैवं तस्य शक्तिग्राहकत्वानुपपत्तिः । अनादितात्पर्यग्राहकसंपादकत्वेन परंपरया ।

कु॰वा॰
६७

प्राप्तिश्चादृकत्वसंभवात्। नचफलस्यपदार्थैकदेशतयातत्रद्वितीयार्थस्येतरान्वयासंभवः। भुक्तिवैचित्र्ये
णमकृते एकदेशान्वयस्वीकारात्। अप्यगमनेनस्पंदस्यादितोधात्वर्थतावच्छेदकफलेस्पंदभेदान्वय
बोधसंभवेन एतादृशप्रयोगस्यवारणाय फलविशेष्यकान्वयबोधेतद्विशेष्यकशक्तिज्ञानजन्यफलो
पस्थितित्वेन हेतुत्वकल्पनस्यावश्यकत्वात्। तादृशकारणबाधेन धात्वर्थतावच्छेदकफले द्वितीयार्थान्व
यासंभवः। नचतादृशतादृशपदसमभिव्याहारज्ञानात् फलविशेष्यकस्पंदभेदान्वयबोधः प्रसिद्धं
तादृशपदसमभिव्याहारज्ञानतादृशावृत्तिजन्यफलप्रकारकोपस्थितिघटितसामग्र्यास्तादृशान्वयबोधो
त्पादकयोग्यतायाअसत्त्वेनउक्तस्थलेतदापत्तिसंभवइतिवाच्यं। यत्रगमनादिपदादेवलक्षणा

रामः
६७

पाशक्तिभ्रमेणवास्वान्तरेणफलोपस्थितिस्तत्रफलविशेष्यकसंदर्भेदान्वयबोधप्रसिद्ध्यागमनपरस
मभिव्याहारतज्जन्यफलोपस्थितिघटितसामग्र्याःफलविशेष्यकस्यत्वाद्यवच्छिन्नभेदान्वयबोधप्र
योजकतायाआवश्यकत्वात् तद्बलेनशक्तिभ्रमानधीनबोधेपिफलांशेस्वेदभेदुर्निधानप्रसंग।एवंचफ
लव्यापारयोःपृथक्शक्तिस्वीकारपक्षेपिननिस्तारः तथात्वेपिद्विगमनेनस्वेदरस्याद्वैफलेशक्तिभ्रमया
स्वेदभेदान्वयबोधसंभवेनतादृशप्रयोगापत्तेर्दुर्वारत्वादितिचेन्नतद्विशेष्यकवृत्तित्वज्ञानजन्यतदु
पस्थितिजन्यतावच्छेदककोटौतादृशोपस्थितेरव्यवहितोत्तरत्वनिवेशनमावश्यकं।विशिष्यतत्तत्प
दमंतर्भाव्यैवपदार्थोपस्थितेरैकैकविधबोधेनाहेतुतायाव्यवस्थापितत्वात् एकपदाधीनतद्विषयक

०वा०
६८

शाब्दबोधे पदांतरवृत्तिज्ञानजन्यत्वस्य तदुपस्थितेर्व्यभिचारस्य प्रकारांतरेणवारणासंभवात् । एवं च धात्व
र्थतावच्छेदकफले द्वितीयार्थान्वयबोधेपि क्षतिविरहात् तत्तादृशकारणस्य व्यभिचारप्रसक्तेः इ
ति वदंति । अन्ये तु विंसते । व्यापारमात्रस्य धात्वर्थतायामपि सर्वानुपपत्तीनामुद्धृतत्वात् । फलावच्छिन्न
व्यापारस्य गुरुतया तथात्वमनुचितं । अपि च फले द्वितीयादेः शक्त्यंतरकल्पनामपेक्ष्य धातोर्विशिष्टे
शक्तिकल्पनमेवोचितं । न च एवं मते व्याधेयत्वे द्वितीयादेः शक्त्यंतरस्य कल्पनीयत्वात्तदंशे सा
म्यमिति वाच्यं । ग्राममध्यास्ते ग्राममधिशेते ग्रामे संपुनः क्रिरस्यादौ द्वितीयायाः सर्वमत एवाधेय
त्वबोधकतया तत्र शक्तिकल्पनस्योभयसाम्यात् । न च द्वितीयायाः संयोगादिवाचकत्वमते आधेय

राम।
६८

त्वेनस्यालक्षणैस्वनतुशक्तिरितिवाच्यं। आधेयतात्वस्याखंडतयासंयोगत्वादिसमशरीरत्वात्। संयोगत्वाद्यवच्छि
न्नेनरूपवच्छिन्नेवाशक्तिः कल्प्यते इत्यत्र विनिगमकासंभवात्। अस्तुवाममाप्याधेयत्वेलक्षणैव शक्तिस्तु सं
ख्यायामेव। यदि च द्वितीयादेः फलबोधकतामते फले पितस्यालक्षणैव न तु शक्तिः शक्तिस्तु संख्यायामेव
संयोगविभागादिरूपस्यैकफलापेक्षया संख्यायां न त्वयोगप्राचुर्यस्य विनिगमकत्वादिति चेन्नैवं तथा
पितन्मते धातुजन्यप्रकृत्याधारेयपास्थिते शाब्दबोधहेतुताकल्पनमधिकं। द्वितीयादिसमभिव्याहृ
रस्थलेऽनुरोधेन फलविशेषावच्छिन्नव्यापारे धातोर्लाक्षणिकत्वापाभवतामप्यावश्यकत्वात्तत्तज्ज
न्यतादृशव्यापारोपस्थितिहेतुतायाउभयसिद्धत्वात्। यदि च स्पंदत्वत्वादिनरूपेणशक्तिर्नमात्रच्छि

कु० वा०
६९

नीमादिनोपिप्रकृतव्यापारबोध आनुभविकइतिमन्मते नव्यापितन्मते शाब्दबुद्धौ द्वितीयादिजन्यफलोप
स्थितेः कारणतायाः कल्पनाधिक्यं। तन्न स्माधेयत्वोपस्थितिहेतुत्वकल्पनस्यात्रोक्तस्थलानुरोधेन
अभ्युपगतएव आवश्यकत्वादिति चेत्। अस्तु मन्मते तादृशकारणताया आधिक्येन मन्मतेनुत्कर्षं।
गच्छतीत्यादिवाक्यस्तानघटितशाब्दसामग्र्याः समानविषयकानुमित्यादिप्रतिबंधकतायाः कल्प्।
प्रकारतानिरूपितव्यापारविशेष्यताशालित्वेन धात्वर्थजन्योपस्थितेर्निवेशनीयतया तस्याः तादृश
विशेष्यताशालित्वेन व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेन वा निवेश इत्यत्र विनिग
मनाविरहात् सामग्रीप्रतिबंधकताधिक्यप्रयुक्तगौरवं च। प्राचीनमते द्वितीयाजन्यफलोप

एम:
६६

।स्थितेः सामग्र्यं तन्निवेशस्य नञ्मतासिद्धतज्ज्ञन्याधेयत्वोपस्थितिनिवेशस्तत्रीय एव इति तन्मते ला
द्यशस्य लेशस्य बोधस्याधिकविषयतया तात्पर्यज्ञानादिकमपि अधिकविषयकमेव शाब्दधीहेतुर्भवि
ष्यति प्रतिबन्धकसामग्र्या मध्ये तन्निवेश्यतीति गौरवं । अथ फलस्य द्वितीयार्थत्वे भूमिं गच्छति न म
हीरुहे इत्यादौ महीरुहवृत्तिसंयोगादेर्जनकतासंबन्धावच्छिन्नाभाव एव नञर्थो वाच्यः। स च वृक्षनि
यामकसंबन्धस्याभावप्रतियोगितानवच्छेदकतया अप्रसिद्धः। नव्यमते तु द्वितीयार्थस्याधेयत्व
स्य फलनिष्ठोऽभाव एव तथेति नानुपपत्तिः। न च भूमिकर्मकगमनकर्त्रौ हौ महीरुहकर्मकगमनक।
र्त्ता च प्रभावः। प्रतीयते इति वाच्यं। कर्तृवाचकपदासमभिव्याहारस्थले तदसंभवात्। न च तत्राप्या।

शु० का०
७०

ख्यातार्थान्वयबोधानुरोधात् कर्त्तृवाचकपदाध्याहारस्यावश्यकतया अध्याहृतपदोपस्थाप्यकर्त्त
र्य्येव तादृशाभावेनत्ताबोधः पेष्यत इतिवाच्यं। आख्यातार्थविशेष्यकस्याप्यन्वयबोधस्य संभवेनाध्या
हारस्यानावश्यकत्वात् भूमेर्गमनेन महीरुहस्येत्यादौ द्वितीयासमानार्थकषष्ठ्यर्थाभावबोधकतया
आवश्यकत्वाच्च। नह्यत्रापि आश्रयतासंबंधावच्छिन्नप्रतियोगिताकगमनाभावः प्रतीयत इति
सम्यक्। अनुयोग्यनुपस्थितेः तत्रानुयोगिविनिर्मोकेनाभावबोधांगी [illegible] तया।
अप्रसन्नत्वादिति चेन्न इति नेयामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वे दोषः कः। जनक
तादिसंबंधावच्छिन्नप्रतियोगिताकसंयोगाद्यभावस्यातिरिक्तस्य कल्पने गौरवमिति चेन्न। नाह

एषुः
७०

139

प्रागभावस्य संयोगजनकत्वात्तदभावसमनियतत्वेन नत्वरूपत्वात्तस्य चोभयवादिसिद्धत्वात्। निरिक्त
प्रतियोगिताकत्वेने गौरवमिति चेदस्त्वेन तद्गौरवं। उपदर्शितबहुविधलाघवेन ईदृशगौरव
स्याकिंचित्करत्वात्। अथ फलस्य द्वितीयार्थत्वे वृत्तिनियामकसंबंधस्याभावप्रतियोगितावा।
च्छेदकत्वेपि स्पंदेगच्छतीति न गुणे इत्यादौ गुणादिनिष्ठस्य संयोगादिरूपफलस्याप्रसिध्यान
न्वयबोधानुपपत्तिरिति चेन्नाधेयतासंबंधावच्छिन्नप्रतियोगिताकप्रकृत्यर्थाभावस्य
द्वितीयार्थफले बोधोपगमात्। गुणेन गुणं गच्छतीत्यादिवाक्यस्याप्रमाणत्वाप्र
माणत्वा। इत्थं चात्राभावस्य द्विधाभानोपगमेन गुणाभाववत्फलानुकूलस्पंदाश्रय

मु०वा०

त्वाभाववान् गुण इत्याकारक एवान्वयबोधः। परे तु वृत्तिनियामकसंबंधस्याभावप्रतियोगितान
वच्छेदकत्वेन समवायेपि द्रव्यं गच्छतीति नाभावमित्याहुरिति विरहस्तथा हि समवायसंबंधावच्छि।
न्नाधेयत्वे वह्नितीयार्थो वाच्यः। अन्यथा कालिकादिसंबंधावच्छिन्नत्वाभावादिवृत्तिसंयोगादिमा
द्रायातिप्रसंगात्। तथा चाभावादिनिरूपितत्वतथाविधाधेयताऽप्रसिद्ध्या तदभावबोधा।
संभवः। निरूपितत्वसंबंधस्य च वृत्तिनियामकतया। समवायसंबंधावच्छिन्नाधेयतायां।
।तत्संबंधावच्छिन्नप्रतियोगिताकप्रकृतार्थाभावबोधो न संभवत्येव इत्याहुरिति। अत्रो
च्यते वृत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वे आधेयत्वं संसर्गः विभक्तेः से

१५१;

ख्यापात्रमर्थः फलावच्छिन्नो व्यापारो धात्वर्थ इत्येवोचितं। अस्तु च व्युत्पत्तिवैचित्र्येण नामार्थधा
त्वर्थयोरपि साक्षादन्वयबोधस्तथा सम्मतिप्रसंगस्य प्रागुपदर्शितप्रकारेणावारणासंभवात्।।
नचैतत्कल्पे लाघवानवकाशः। फलेस्वतंत्रशक्तिकल्पने। सामग्रीप्रतिबंधकतायां द्वितीयादि
जन्यफलोपस्थितिः। धातुजन्यव्यापारोपस्थितिरिति। उभयनिवेशस्थाने धातुजन्यविशिष्ट
विषयकोपस्थितेरेकस्यानिवेशेन लाघवात्। वस्तुतस्तु शाब्दबुद्धेरधिकविषयत्वे एवं गुरु
घटत्वादेः स्वत्वाद्यैः संसर्गतानिराकरणावसरे सामग्रीप्रतिबंधकतावालाघवस्य दर्शित
त्वात्। द्वितीयादेराधेयत्वमर्थः फलावच्छिन्नव्यापारश्च धातोरित्येव युक्तं। कर्माख्यातस्थल

मु० ०

कर्मणे:। अन्यथा ग्रामो गम्यत इत्यादौ ग्रामादेः व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुप
पत्तेः। यादृशविशेष्यविशेषणभावापन्नयोः यदृशक्यताताद्दृशविशेषणविशेष्यभावापन्न।
योरेव शाब्दबोधे भानसंभवात्। ननु विपरीतविशेषणविशेष्यभावापन्नयोः। यत्नुकलेधात्वोः
रूपकृत्स्नुपगमात् व्युत्पत्तिवैचित्र्येण कर्त्राख्यातसमभिव्याहारस्थले व्यापारविशेषण
तयाभासमानस्य फलस्य कर्माख्यातस्थले तद्विशेष्यतया भानमिति तत्तत्पृथक्शक्ति।
स्वीकारे शाब्दसामग्र्याः प्रतिबंधकतायां विशिष्टविषयकउपस्थितिद्वयकल्पने गौरवात्
।गम्यादेः समपूर्वयुजप्रभृतिसमानार्थकताभ्युपगमनापि वविशेषदर्शिनामपि गमनं न

रामः

स्पंदस्स्यादित्वाख्यातसंयोगादौ स्पंदमैत्रान्वयबोधापत्तेर्दर्शितायाद्दुर्वारत्वात्। संयोगादिविशेष्यक
वृत्तिज्ञानजन्यत्वनदुपस्थितेः। घटितायास्तथाविधान्वयबोधसामग्र्या अक्षतत्वात्। तद्वृत्त्युपस्था
प्यव्यापारांशे तत्तद्विशेष्यकबोधतात्पर्यज्ञानस्य तादृशान्वयबोधप्रतिबंधकताकल्पने गौरवा
दिति। यदि च फलस्य द्विधा मानं चेदनुभवविरुद्धं तदा पुनरनापत्त्या फलव्यापारयोः खंडश
क्तिद्वयमेव धातोः स्वीकरणीयं। आख्यातस्याश्रयत्वमेवार्थः अधिकमग्रे वक्ष्यते। अथ।
द्वितीयाया आधेयतार्थकत्वे व्यापारेऽन्वयतात्पर्येण ससप्पास्वद्वितीयाया अपि स्या।
योगापत्तिः न हि गेहे पचतीत्यादिवत् गेहं पचतीति कश्चित् प्रयुक्ते एवं धात्वर्थतावच्छे

मु०वा०

एकफलांशे आधेयत्वान्वय एवनादृशद्वितीयायाः आकांक्षानिरूपकत्वकल्पनापारेतु
दुपस्थापितेनाधेयत्वान्वयासंभवात्। सप्तम्यधीनाधेयत्वोपस्थितिसप्तमीसमभिव्याहारस्ता।
नघटिताया एव सामग्र्यास्तादृशान्वयबोधे नियामकत्वात्। द्वितीयासप्तम्योः समानार्थक
तेपि मुसलं निभेदत्तापनाधेयवर्षपक्षसूत्रे एतयोर्विधानात्। अथाधःसंयोगावच्छिन्नस्प
दत्र पतनधात्वर्थत्वात् धात्वर्थतावच्छेदकीभूतफले आधेयत्वान्वये तात्पर्येण भूमिं पतती
ति प्रयोगापत्तिः। न च द्वितीयोपस्थिताधेयत्वप्रकारकफलविशेष्यकान्वयबोधे गम्या।
दि नाम फलोपस्थितितत्प्रकारकसमभिव्याहारघटितसामग्र्येव प्रयोजिका न तु पतथा

उ७:

३

नुजन्मतदुपस्थितिघटितसामग्री तिनाप्रसंगइतिवाच्यं। यत्तधातुनैवपत्रसंयोगावच्छिन्नग
मनंलक्षणादिनोपस्थापितन्नत्रसंयोगेद्वितीयार्थाधेयत्वान्वयात्। अत्राहुः। धातुजन्यसुद्ध
संयोगावच्छिन्न [illegible] संदोपस्थितः शाब्दबोधकारणतायां अ
वच्छेदकघटकसंयोगविषयतायां अविकरणतानवच्छिन्नत्वं विशेषणं देयं। तथाचतादृ
शविषयताशालिसंयोगाद्युपस्थित्यादिघटितसामग्र्यात्वसंयोगविशेष्यकद्वितीयोप।
स्थाप्याधेयत्वान्वयबोधप्रयोजकत्वोपगममात्रातिप्रसंगः। नचैवमपिफलावच्छिन्नव्या
पारबोधकतयासकर्मकत्वव्यवहारापत्तिर्दुर्वारैवेतिवाच्यम्। आश्रयतानवच्छिन्नफलाव।

वा०

उत्तरदेशेनानवच्छिन्नमेवफ

च्छिन्नव्यापारबोधकत्वेऽपि तस्य तदव्यवहारनियामकत्वात्। संयोगावच्छिन्नक्रियानुकूल

लिङ्गस्याद्यर्थतावच्छेदकेऽरतिनानुपपत्तिः। अतएवास्ति संयोगावच्छिन्नक्रियानुकूल

व्यापारस्यानुद्देश्यत्वेऽपि तया धात्वर्थतावच्छेदकसंयोगाश्रयस्याप्यनेनेतनत्कर्मता। आ

श्रयानवच्छिन्नावच्छेदकता श्रयफलवत्वविरहात्। संयोगनिष्ठाया धात्वर्थतावच्छे

दकतता या आश्रयेऽप्यनिनावच्छिन्नत्वात्। नवात्रिविशेषितसंयोगस्य धात्वर्थताव

च्छेदकत्वे ऽप्योघनेजुहोतिरित्यत्रानन्वयप्रसंगात्। उद्देश्यतावच्छेदकविधेययोरैक्यादिति

वाच्यं। तत्र संयोगनिष्ठायामुद्देश्यतापावच्छेराधेयतासंसर्गेणावच्छेदकतयास्य सम्पर्थ

एप्रः

४

स्याग्निवृत्तित्वस्य च विधेयतया उद्देश्यतावच्छेदकविधेययोरैक्यानवकाशात्। वस्तुतस्तु
तत्रानन्वयेपि न क्षतिः। मुख्यत्वानां नानादेशप्रयोगस्याप्रामाणिकत्वात्। संसृष्टे च होमकृत्यादि
मारिस्थले च विधेयांशेऽधिकावगाहनात्तत्रास्त्येवानुपपत्तिः। एतादृश आश्रयानवच्छिन्नत्वधा
त्वर्थतावच्छेदकक्रियारूपफलाश्रयत्वात् कर्मत्वोपपत्तिः। यत्तु धात्वर्थतावच्छेदकत्वे धानु
वृत्तित्वरूपविशेष्यांशे साक्षात्प्रकारकारकत्वं तत्र च क्रियायामेव न संयोगांशेपीति निरुक्तेर्जुहोतिक
र्मतापत्तिरिति। तदसत्। अग्निं ग्रामं नयतीत्यादौ संयोगावच्छिन्नक्रियानुकूलव्यापारादिरू
पधात्वर्थे संयोगांशे साक्षात्प्रकारतया तदाश्रयीभूतग्रामादेः कर्मत्वानुपपत्तिर्नीवहादे।

ग्रा०शे० द्विकर्मकत्वव्याघातात्। अपादानग्रामादेः प्रधानकर्मत्वेनाख्येयापितु गौणकर्मत्वमेव। अत एव।
नादुह्याकर्मत्वमाख्यातेनाभिधीयते। प्रधानकर्मण्याख्येयेलादीनां कुर्द्विकर्मणामित्यनुशास
नादित्यजां ग्रामो नीयते इत्यादिको न प्रयोग इति चेन्न हि तत्र ग्रामादेरपि वाच्यापि धात्वर्थताव
च्छेदकफलशालित्वेन गौणकर्मत्वापसावर्हिंह्व नेंजुहोनीतिप्रयोगापत्तिर्दुर्वारैवेति।
अस्मन्मते चाप्रधानवच्छिन्नसंयोगविषयताशालित्वानुजस्मतदुपस्थितिघटितसाम।
ग्र्याएव संयोगे द्वितीयार्थान्वयबोधप्रयोजकत्वान्नेनादृशप्रयोगापत्तिः। ननु अधः सं रामः
योगावच्छिन्नस्पंदोनपतनमर्थः। अपितु गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्न

५

एव अत एव फलावच्छिन्नव्यापारबोधकत्वात्। न सकर्मकत्वमिति तन्न। फलस्य धात्वर्थताव
च्छेदकत्वे स्पंद एव समभिव्याहृतार्थान्वयस्योपगंतव्यतया पर्णो गिरेर्निःस्पन्दस्य भूतलावच्छिन्नतया भूत
लेपततीति प्रयोगानुपपत्तिः। पर्णो गिरेस्तु तत्संयोगस्य परंपरया भूतलादिवृत्तित्वमिति चेत्तर्हि।
वृक्षात्पततीत्यत्र वृक्षे पततीत्यपि स्यात्। अस्मन्मते चाम्रव्यापारे समभिव्याहृतार्थान्वयेऽपि अत्र।
अनुत्पत्तिवेद्धिस्यात्। अथ संयोगस्य धात्वर्थतावच्छेदकत्व एव तदन्वयबोध इत्यदोषः। अ
मेतु भूम्यादेः कर्मत्वविवक्षायां भूमिं पततीति प्रयोग इष्ट एव। अत एव द्वितीयाश्रितेत्यादि
सूत्रे एनत्कपतितेत्यादिस्थले द्वितीयासमासविधानमुपपद्यते। धात्वर्थतावच्छेदकता

वा०

वच्छेदकफलेद्वितीयार्थान्वय एवाभ्युपानवच्छिन्नफलोपस्थितेर्विवक्षा अग्निं जुहोतीति
प्रयोगवारणाय स्वो क्रियते इति वदंति। तदपि न शोभनं। तथा सति भूम्यादिपदोत्तरं का
दावितससमीकरणविद्वितीयेस्तत्रनियामकाभावप्रसंगात् आपाततः शेच्छापेयत्व विवक्षा
यां समसमीफलांशेन द्विवक्षायां द्वितीयेस स्यउक्तयुक्त्या फलांश एव समस्त्यर्थान्वय।
स्यावश्यं स्वीकरणीयतया वक्तुमशक्यत्वादिति। ब्राह्मणाय धनं ददातीत्यादेः स्वस्व
त्वनिवेशः। दाने च न संप्रदानस्वत्वजनकमपि तु नन्न स्वीकार एवेति प्रतेनु स्वस्व।
ध्वंसानुकूलेपरस्वत्वप्रकारिका इच्छेव ददात्यर्थः। स्वस्वत्वध्वंसरूपफलाश्रयत्वाद्धन

एम।

६

स्यकर्मता। धनं प्रतिगृह्णातीत्यादौ स्वस्वत्वजनकेच्छारूपस्वीकारविशेषो धातोरर्थः। स्वस्वत्व
रूपफले च द्वितीयार्थाधेयत्वान्वयः। तंडुलं पचतीत्यादौ रूपादिपरावृत्तिजनकतेजःसंयोगो
धातोरर्थः। रूपादिपरावृत्तिफले च तंडुलादेर्वृत्तित्वान्वयः। ओदनं पचतीत्यादौ ओदनादि
पदस्य तन्निष्पादकतंडुलादौ लक्षणा। अवयवविनिपाकानकूपगमेव तंडुलं पचतीत्या।
दौ तंडुलादिपदस्य तदारंभकपरमाणुपुंजलक्षणा। ओदनं भुंक्ते इत्यादौ गलाधोनयनं धा
त्वर्थः। सवगलाधः संयोगावच्छिन्नक्रियानुकूलव्यापारः। तादृशक्रियारूपफल एव ओ
दनवृत्तित्वान्वयः। उक्तयुक्त्या गलाधोदेशस्य न कर्मत्वं। अतः सकर्मकधातूनामव्यर्थाः।

152

कु०वा०

स्वयमूह्याः। गां दोग्धि पयः इत्यादौ द्विकर्मकधातुसमभिव्याहृतगवादिपदोत्तरद्वितीया। क्रियाज
न्यफलशालित्वादस्यैव कर्मत्वं बोधयति। कारकाधिकारीये नाकथितं चेति सूत्रेणापादान
त्वादिभिन्नं धातुप्रतिपाद्यान्वयिधर्मानवच्छिन्नस्यापि कर्मसंज्ञाभिधानात्। गवां पयो
दोग्धीत्यादौ धातुप्रतिपाद्यान्वयिगवादिसंबंधो न विवक्षितः अपितु क्षीरघृत्वयी सहति
कर्मत्वाविवक्षया द्वितीयानवकाशः किंतु शेषे षष्ठ्येवेति। धातुप्रतिपाद्यत्वे तदर्थताव
च्छेदककोटिप्रविष्टसाधारणं गां पयो दोग्धीत्यादौ धात्वर्थावच्छेदककोटिप्रविष्टत्व
व द्वितीयार्थान्वयात्। तथाहि। क्षरणानुकूलव्यापारो दुहार्थः। द्वितीयार्थश्च जनक।

रामः

२

153

त्वं संबंधेन क्षरणान्वयी विभागः। विभागे वाधेयतया प्रकृत्यर्थगवादेरन्वयः। एवं च धात्वर्थता
वच्छेदकक्षरणरूपफले प्रधानकर्मक्षीराद्यन्वितद्वितीयार्थस्यान्वय इति गोनिष्ठविभागानु
कूलपयोनिष्ठक्षरणानुकूलव्यापारकर्ता मैत्र इति गां पयो दोग्धि मैत्र इति वाक्यप्रधीनो
बोधः। ननु विभागोऽपादानत्वमिति तादृक्षायां द्वितीयानवकाश इति वाच्यं। धात्वनुवृत्ति
पदविशेष्यान्वयिनो विभागस्यैवापादानत्वरूपत्वात्। वृक्षात् पर्णं पततीत्यादौ स्पंदरू
पविशेष्यांशे एवं पंचम्यर्थविभागान्वयात्। वस्तुतो विभागावच्छिन्नक्षरणानुकूलो व्या
पारो दुह्यर्थः। द्वितीयार्थश्च विभागान्वयिनी वृत्तिरेव। नचैवं धात्वर्थतावच्छेदकफलशा

मु॰ वा॰

लित्वस्त्वं कर्मत्वमेवात्रापि प्रतीयत इति नाकथितेनैव मस्य विषय इति वाच्यं। धात्वर्थतावच्छे
दकत्वस्य धातुवच्छित्विशेष्याशेसाक्षाद्विशेषणत्वरूपत्वात्। यत्र च क्षरणानुकूलव्या
पारमात्रे पात्वर्थतया विवक्षितं क्षरणान्वयि विभागश्च विभक्त्यर्थतया तत्रापादानत्व
बोधिका पंचमी। एतेनकदाचिदुग्धं दोग्धि पयः। कदाचिच्च गोभ्यो दोग्धि पय इत्यत्र नानियमः
। अथवा गोभ्यो दोग्धि पय इत्यत्रापि विभागो धात्वर्थतावच्छेदककोटिप्रविष्ट एवेदं। रायः
क्षाद्भिस जनेदत्रैवावधित्वरूपापादानत्वविवक्षायां पंचमी। आश्रयत्वविवक्षायां च
द्वितीया। वुधित्वं चाश्रयत्वादन्यत्स्वस्वरूपसंबंधविशेषः। अत्र क्षरणान्वयिनः परसम

८

155

वेतत्वस्य द्वितीयार्थत्वात् पयोनिष्ठक्षरणस्य पयोनिष्ठविभागजनकत्वेपि न पयः दोग्धीति प्रयो
गः। एवं च विभागान्वयिनावच्छेदकावच्छिन्नापेक्षया बोध्यं। दुह्यते गोः क्षीरं इत्यादौ क्षरणज
न्यविभागाश्रयत्वेन गवादेर्निष्ठ अप्रधानकर्मत्वमाख्यातार्थः। अप्रधाने दुहादीनामित्यनुशा
सनात्। क्षीरवृत्तित्वस्य धात्वर्थक्षरणएवान्वयः। आख्यातार्थक्षरणेन धात्वर्थव्यापारान्वयः।
तथा च विभागावच्छिन्नक्षीरनिष्ठक्षरणानुकूलव्यापारजन्यक्षरणजन्यविभागाश्रयो गौरि
त्याकारको बोधः। अथवा विभागक्षरणव्यापारेषु विशकलितेषु धातोः शक्तित्रयं वि शि
ष्टलाभो न्वयबलात्। कर्माख्यातस्थले चाकांक्षावैचित्र्येण तेषां विशेष्यविशेषणभावबे

मु०वा०

परीत्वात्। व्यापारजन्यक्षरजन्यविभागपर्यंतस्य धातुनलाभः। आश्रयत्वमेवाख्यातार्थः।
एवं च क्षरण विभागयोः नद्विधाभाने। गौणकर्मी समभिव्याहृते दुग्धे नेक्षीरमित्यादौ आख्या
तेपदेन केवलेन धातुसहितेन वा विभागावच्छिन्नक्षरणाश्रयत्वरूपप्रधानकर्मत्वस्य।
बोधनेपि एकदेशान्वय विधकर्मत्वबोधकत्वस्यायुक्तत्वं तथा दुह्यतेक्षीरं गौरित्याद
योनप्रयोगाः। पौरवं गां याचते रत्नानीत्यादेः स्वकरणेच्छाया वस्यर्थः। प्रधानकर्मगवा
द्यन्वितं द्वितीयार्थविषयत्वे धातुर्येता पच्छेदकतानेऽन्वेति। सविषयकत्वादिरूप एमः
विषयोपहितबोधकधातुस्थले स्वविषयविषयत्वमेव प्रधानकर्मत्वं। अत एव तु

६

टाजिज्ञास्यतेइत्यादौघटादेःसन्नेतकर्मता। अथैवंयवदुःखविषयकेच्छानमप्रसिद्धेतद्दुःखरूपकर्म॥
मिआदृतधातुघटितवचसःकागतिरितिचेत्॥ यागतिर्गगनेदिदृक्षेन्नेदृष्टादिकस्य। अंतेगुरुषी
यगगनादिप्रकारकदर्शनेच्छाबोधकवाक्येगगनविषयकत्वप्रकारकदर्शनेच्छाबोधस्त।
त्रेतिचेत्॥ इहापिगोविषयित्वप्रकारतानिरूपितस्वत्वेच्छानिष्ठविषयताशालीच्छाबोधस्तद्दु
ःखद्वेषस्य। विशेषादर्शिमात्रविषयतापिसमाविवेचनीयेचेदमग्रे॥ योरवयवतरास्तुद्वितीयाया
स्तत्वरत्तिरेव। तस्यादानेन्वयः॥ योरवस्तस्तादृशदानाश्रयत्वमेवाप्रधानकर्मत्वं। नचैवमिच्छा
विशेषरूपदानस्याश्रयत्वंकर्तृत्वमेवेतिवाच्यं॥ धात्वजन्मप्रतिपत्तिविशेषीभूतदानाश्रय

वा०

त्वस्यैव तत्कर्तृत्वस्वरूपत्वात्॥ अत्र वदानस्य नादृत्य प्रतिपत्तौ इच्छारूपधात्वर्थे विशेषणत्वात्। चै
त्रेणयोरवोगोपा। अतैरसारावधुक्तक्रमेण चैत्रवृत्तिइच्छाविषयगोकर्मकदानाश्रय तौरवद्दस
न्वयवोधोवोध्यः। यद्यपि निरुक्तपाचभिप्रेतौ वेति दुहिपाचिरुधिप्रच्छिचि। सिविशासिसत्रार्थपर
भिक्षुपदतैनेनेव चरितार्थे नयापाचेरुपादानमनर्थकं तथापि पाचमानः। शिवं सुरानिस्या।
द्रीयाचते नीनहृक्षभिप्रायकतेतिपरुपादानं। तत्र द्विकर्माधारमत्वप्रकारकेच्छा धात्वर्थः।
इच्छावांप्रधानकर्मकत्याणान्विते द्वितीयार्थविषयितायामन्वयः। मापारेव सुरान्वि
तद्धत्तित्वस्य द्वितीयार्थस्यान्वयः। तथा च सुरवृत्तिविषयारजतत्वप्रकारक कस्याले इच्छाश्र

एम:

१

159

यद्दत्यन्वयबोधः॥ ग्रामे तिष्ठतीत्यादौ देशान्तरसंचारविरोधिव्यापारो धात्वर्थः। संचारविरोधित्वं।
संचारानुत्पादप्रयोजकत्वं। अनुत्पादे प्रधानकर्मणो वृत्तित्वान्वयः। देशविशेषणत्वे अभेदे ग्राममिति
ष्ठतीत्यादौ तत्तार्थ ग्रामप्रतियोगित्वान्वयः। रुध्यते गां व्रजं इत्यादावन्वयबोधः स्वयमूहनीयः॥ गु
रुं धर्मं॥ पृच्छतीत्यादौ जिज्ञासाबोधकव्यापारो धात्वर्थः। बोधे गुरुवृत्तित्वस्य। जिज्ञासायां।
धर्मविषयकत्वस्यान्वयः। शिष्यो धर्मं ब्रूते इत्यत्र ज्ञानानुकूलशब्दप्रयोगो धात्वर्थः। ज्ञाने धर्म
विषयत्वस्य। शिष्यवृत्तित्वस्यापि अन्वयः। अथात्र तथा सति यत्र जिज्ञासाविषयकत्वे ज्ञाने
च यत्प्रश्नः। तादृशधात्वर्थसामग्रीबलेन मैत्रस्यापि प्रच्छकजिज्ञासासत्त्वात्। तत्रैमे पृच्छती।

सु०वा०

तिप्रयोगस्य। एवं यत्र चैत्र ज्ञानेछया वृते देवदत्ताच्चैत्रस्यापि ज्ञाने तत्र चैत्रे वृत्तइति प्रयोगस्या।
चापत्तेः। साक्षाद्धात्वर्थविशेषणं। ज्ञानस्य फलं। अथ वथा तत्र गुर्वादीनां प्रधानकर्मतया अप्र
धाने दुहादीनामिव ननु श्यसन विरोधेन पृच्छाते गुरुर्धर्मं संप्रदत्तेन कस्त्वं भोः शिष्य उच्यते।
धर्ममित्यादिस्थले चलकारादिनाऽनत्कर्मत्वाभिधानानुपपत्तेश्च। परंतु जिज्ञासा ज्ञानोद्देश्य
कप्रवृत्त्यधीन शाब्दः त्वान्ने रर्थः। ज्ञाने गुरुवृत्तित्वस्यान्वयः। शब्दे च धर्मविषयकत्वस्य। शाब्दस्य।
च विषयताभावानुवेधिनी। ज्ञानस्य परंपरया शाब्दस्य धात्वर्थविशेषणत्वात् नदाश्रयी
भूतगुरोर्गौणकर्मता धर्मस्य च धात्वर्थविषयतया प्रधानकर्मता।। वुभुत्सु ज्ञानोद्देश्यकप्रवृत्त्य

एम।

११

धीनशकोऽर्थः॥ स्थानेशिष्यवृत्तित्वस्यप्रकारत्वधर्मविषयकत्वस्यान्वयः। अजांग्रामंनयतीत्यादौ
ग्रामंभारंवहतीत्यादौचउत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापाररूपंप्रापणंधातोरर्थः॥
तत्रक्रियारूपेफलं। अजाभारादिवृत्तितान्वयः संयोगरूपफलेचग्रामादिवृत्तित्वस्यान्वयः॥
तथाचग्रामवृत्तिसंयोगजनकाजादिवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयबो
धः॥ ग्रामादिर्गौणंकर्म। अजादिःप्रधानं नीयतेअजाग्रामं। उह्यतेभारोग्रामंचैत्रेणेत्यादौउ
त्तरसंयोगावच्छिन्नक्रियारूपेफलेकर्म। व्यापारार्थस्तत्रचधात्वर्थस्यतादृशव्यापारस्यअन्यतासं
बंधेन। तस्यचाश्रयतासंबंधेअजाभारादिरूपप्रधानकर्मण्यन्वयः। ग्रामादिवृत्तित्वान्वयस्त

०बा०

संयोगएव॥एवंचैत्रोग्रामंगच्छतिजन्योयःसंयोगावच्छिन्नक्रियानुकूलव्यापारस्तज्जन्यग्रामवृत्तिसं
योगानुकूलकर्मवानजादिरित्यन्वयबोधः॥नचकारकविभक्त्यर्थस्यधात्वर्थएवान्वयनियमात्॥ग्रामयो
गस्याप्यसंयोगेकर्थंग्रामादिवृत्तित्वान्वयइतिवाच्यं॥भूतलेघटइत्यादौघटादिपदार्थेपिअधिकर
णसप्तम्यर्थान्वयात्तादृशनियमासिद्धेः॥अस्तुवाधात्वर्थतावच्छेदकतावच्छेदकतयाभासमाने
संयोगएवतदन्वयः॥फलव्यापारयोःपृथक्शक्तिमतेवाश्रयत्वमेव आत्मनेपदार्थउत्तरस्येयो।
गावच्छिन्नक्रियास्वधात्वर्थएवव्यापारस्यधात्वर्थविशेष्यतयाश्रयत्वविशेषणतयाद्धु॥अन्वे एम:
ति।तदेकदेशेसंयोगएवग्रामादिवृत्तित्वान्वयः।चैत्रोयच्छतिजन्यव्यापारजन्यग्रामवृत्तिसंयोगानु

कूलक्रियाश्रयत्ववानज्ञातिरित्याकारकोबोधः। ज्ञानानुकूलशब्दस्य कर्मेति रूपयतीत्यादौ धातोरर्थः।
तादृशविशिष्टे कार्यस्य एकदेशे ज्ञाने शेआधेयत्वान्वयबोधे च न द्वितीयाकांक्षा कोक्षत्वात्सीक्रियते अ
पितु विषयत्वा अन्वयबोध एवेति शिष्यं कर्मे निरूपयतीत्यादिर्नि प्रयोगः॥ यत्तु धात्वर्थो ज्ञानमेव तदनु
कूलव्यापारश्च णिजर्थ इति तदसत्॥ धातोश्चुरादौ तर्गततया स्वार्थ एव णिचो विधानात्॥ अस्मा
थात्निरूपयति इत्यस्य ज्ञापयतीत्यादि समशीलतया शिष्यं ज्ञापयति इत्यादिवत् शिष्यं निरूपयती
ति प्रयोगस्य दुर्वारत्वात्॥ अजां ग्रामं प्रापयति शिष्यं शास्त्रं ज्ञापयति ब्राह्मणमन्नं भोजयति।
यजमानं मन्त्रं पाठयति घटं जनयति नाशयतीत्यादौ णिच् प्रत्ययप्रकृतिभूतधात्वर्थकर्तृवाचका

164

१०

आदिपदोक्तरद्वितीयायामुख्यभाक्तसाधारणंकर्तृत्वमेवार्थः। गतिबुद्धिरित्यादिसूत्रेणकर्तुःकर्मसं
ज्ञाविधानात्॥ गतिस्तानोत्पत्त्यादिनिरूपितंकर्तृत्वंचाश्रयत्वमेव। गत्यर्थः संयोगानुकूलक्रिया
नुकूलव्यापाररूपभोजनकेठतात्वाछुभिछ्यातरूपपाठनिरूपितंचतरनुकूलत्वमितत्वं।ना।
शनिरूपितंचप्रतियोगित्वं। तस्यचनिरूपकतासंबंधेनधात्वर्थः त्वयः। तन्मतेचयत्राश्रय।
त्वंकर्तृत्वंनत्वाधेयत्वंद्वितीयार्थः।यत्रानुकूलत्वमितिमत्वंतत्रहतिजन्मत्वं।यत्रप्रतियोगित्वं॥
तत्रानुयोगित्वंतेषांचाश्रयतासंबंधेनैवधात्वर्थः त्वयः।। गत्यर्थादिभ्योमत्रचालिचुमत्वयम्रहति
धात्वर्थकर्तृवाचकपदात्तद्वितीया। तादृशकर्तृः कर्मतातिदेशाविषयत्वात्तेनपाचयमत्त्वं॥

एम्ः

९३

165

हायेनेस्यायएवप्रयोगाः। ननुपाचयत्योदनं सहायमित्यादयः। केचित्तु पाकारिकर्तुः कर्मत्ववि
रहेपि लंघनसमुदायस्यापि धातुत्वे नत्तत्कर्मतयास्सहायादेः पाचयत्योदनं सहायमित्यादयः प्रयोगा
अपिसाधवः। अत एवाजिग्रहत्तं जनकोधनुल्लंघित्यादयो न दिग्प्रयोगाः। गतिबुद्धीत्यादिसूत्रे च नि।
यमपरतयागत्यर्थधातुयोगे कर्तृप्रत्ययासाधुत्वज्ञापकेतेन पाचयत्योदनं सहायेनेत्यादिवत्। अ
जयाग्रामं प्रापयतीत्यादयो न प्रयोगाः स्युः॥ एवमप्ययमाशयः हेतुमति चेत्यनुशासनात्। लि
जयौ हेतुकर्तृत्वं न च स्वतन्त्रस्य कर्तृप्रेरणा असमनिष्ठकर्तृत्व निर्वाहकस्या पारतन्त्र्या। कर्तृत्वं क्व।
चित्रयलः क्वचित्तान्यत्वादिकं याद्दशप्रधानं तत्तत्ख्यातेन याद्दश कर्तृत्वं बोध्यते तदुत्तरं निच्प्रस

लुं०वा०

येनतादृशकर्तृत्वनिर्वाहकव्यापारोबोध्यते। अतएवपाचयतीत्यादौपाकादिरूपत्वनिर्वाहकः स्वापय
तीत्यादौज्ञानाश्रयत्वनिर्वाहक। नाशयतीत्यादौनाशप्रतियोगित्वनिर्वाहकोव्यापारः। प्रतीयमेति।
र्वाहकत्वंचस्वस्वरूपसंबंधविशेषजनतुजनकत्वंअतोननाशयतीत्यादावनुपपत्तिः। एवंचएतद्धातु
प्रतिपाद्यतावच्छेदकफलंकर्तृत्वमेव। निर्वाहस्यैवफलत्वात् तदाश्रयतयास्वतंत्रस्यकर्तुः कर्मता
(तादृशफलविशेषणतयास्वतंत्रकर्तृत्वतत्त्वविवक्षायांपाचयत्योदनेसहायविसादयः प्र।
योगाः। यदातुपाकादिविशेषणतयासहायादिकर्तृत्वेविवक्षितेतदापाचयत्योदनंसहायेन॥
स्वादयः। अथयत्रचैत्रमैत्रोभयकर्तृकएवपाकस्तत्रचैत्रमात्रंप्रयोजमतियत्तदत्तेमैत्रेएत्रैपाच

प्रमः

यतीस्व[illegible]ो तिप्रयोगापत्तिरिति तत्रापि एतदर्थे हन्तावेवत्तीयोतार्थे मैत्रादिवत्तित्व।
स्यान्वयो वाच्यः। एवं च मैत्रे पाचयतीत्यादिवाक्यजन्यबोधो वैलक्षण्यापात्। द्वितीयात्तृतीययोस्तात्पर्य
भेदेन व्यवस्थापानसंगतिरिति चेन्न। अगत्या तत्र पाकादिविशेषणत्वं हनेः पारतंत्र्येण व्यापारवि
शेषणीभूतानिजर्थे हन्तावभेदान्वयप्रयुगम्योक्तातिप्रसंगस्य वारणीयत्वात्॥ प्रत्यर्थे कोदृशे
हनेः हतो पाकादेरिव हन्तेरप्यन्वयो मुलत्तिं वैचित्र्यात्॥ वस्तुतः कर्तृत्वं व्यापाराश्रयत्वमेव॥
णिजर्थः। विशिष्टलाभोऽन्वयबलात्॥ केचित्तु अनुकूलव्यापार एव णिजर्थः। न रत्नपिनी
गमनदीनभोजनक्रियैव धात्वर्थतावच्छेदकं फलं। तत्संबंधित्वादृशक्रियाकर्तृत्वं

व्यु०वा०

नकर्मता। तादृशक्रियासंबंधश्चाश्रयत्वकृतिमत्वाद्युभयसाधारणः॥ अतोगमनादिसंबंधिकालादेर्ना

तिप्रसंगइत्याहुः॥ अत्रचतादृशकर्मवाचकपदात्कदाचिद्वितीयाकदाचित्तीयाइत्यत्रनियामकमुपा

व।तादृशपदोत्तरयोस्तस्वार्थकतयाविवक्षाभेदरूपनियामकासंभवादितिविंतनीयं॥ अ

जाग्रामंप्राप्यतेचैत्रेणेत्यादौचैत्रकर्तृकव्यापारनिर्वाह्ययत्ग्रामवृत्तिसंयोगानुकूलक्रिया

कर्तृत्वेनदाश्रयअजाइतिबोधः॥ तत्रसंयोगावच्छिन्नक्रियाधानुलभ्या। संयोगेग्रामेमित्यादिद्वि

तीयानाप्यग्रामादिवृत्तित्वान्वयबलात्ग्रामादिवृत्तिसंयोगावच्छिन्नक्रियालभ्यते। ताद

तम:

दृशाः ऐजर्थकर्तृत्वेन्वयः॥ कर्माख्यातादिमनभिव्याहारनियंत्रितमुख्यातिबलाद्युक्तादः॥

२५

क्रिया।न्वितकर्तृत्वं तृतीयार्थः चैत्रादिकर्तृत्वविशेषितव्यापाररूपापरणिजर्थेन निर्वाह्यत्वसंबं
धेन विशेषितं। अजादिरूपकर्मीभूतकर्तृविशेषणीभवदाख्यातार्थाश्रयत्वे विशेषणतया भा
सत इति। येत्तु गतिबुद्ध्यादिसूत्रस्य संज्ञाविधायकत्वे वर्ण्यते तेषामयमाशयः। व्यापार।
एव णिजर्थः। तत्र धात्वर्थक्रियायाः स्वकर्तृत्वनिर्वाहकत्वसंसर्गः। अतो न कर्तुः कर्मत्वे सूत्रा
नरश्याने।। माण्वतेश्रामम जाद्रस्यादेस्वनिर्वाह्यकर्तृतानिरूपकत्वसंबंधेन व्यापारविशेषितधात्व
र्थः। कर्तृत्वेत्वेति। न च श्रयत्वसंबंधेनाजादेर्विशेषणतया भासते। तादृशव्यापारे तृतीयार्थः।
स्य चैत्रादिकर्तृत्वस्य। धात्वर्थैकदेशे संयोगादिरूपफले च द्वितीयार्थस्य वृत्तित्वस्य विशेष

८ वा०

तयामाने। एवं तेनाख्यातस्यापि कर्तृत्वमेवार्थः। नत्र च तस्य वृत्तिः ह्स्मेव। न चोक्तस्य धात्वर्थ
स्य विशेषणतया प्रथमान्तपदार्थस्य च विशेष्यत्वेन तथा भासते। न च यत्र समभिव्याहृताख्यातोपस्थाप्य
कर्तृत्वस्यान्वयबोधोपगमे गम्यन्ते चैत्र इत्यादितोपि गमनकर्त्ता चैत्र इत्यन्वयबोधः स्यादिति वाच्यं
। एवं तेन पदसमभिव्याहृताख्यातस्यैव कर्तृत्वान्वयबोधनियामकत्वात्।। अथैवमजायाप्यतेर।
आत्मादेः कर्तृत्वस्य आख्यातबोध्यत्वे कर्त्तरि शवित्यपवादविषयतया यकोऽसाधुतापत्तिः। न च
यादृशधात्वर्थं सार्वधातुके विहितेनाट्पद्धात्वर्थनिरूपितकर्तृत्वस्य तेन विवक्षणामेव क
र्तरि शवित्यादेः शबादिविधायकत्वात्। प्रकृते एवं तेन समुदायस्य कर्त्तारमेवाख्यातेनेन तदर्थीति

एव:

२६

[7]

रूपितकर्तृत्वं च न बोध्यते अपि तु एवं विशेषितेन धात्वर्थविशेषितेन धात्वर्थान्वितकर्तृत्वमेवेति न तादृशा

पवादविषयतेति वाच्यम्। कर्माख्यातस्थले विशेष्यविशेषणभाववैपरीत्येन व्यापारविशेषितक्रि

याया अपि रूपितधात्वर्थत्वान्नैवं। लकारसामान्यस्यापत्रकर्तृत्वमपनीयते तत्रैव कर्त्तरि शविस्य

स्यश्लिविधायकता अत्र कर्मवत्समशीले कर्तृत्वे आत्मनेपदत्वेन शक्तिः। वस्तुतः फलव्यापारयोः

पृथक्धात्वर्थतामते गच्छतीत्यादाविव गम्यते इत्यादावपि लकारेणाश्रयत्वरूपकर्तृत्वा

भिधानेपक्षे अनुपपत्तिरिति परस्मैपदसमभिव्याहृतधातुना यादृशविशिष्टोऽर्थः। प्रत्या

य्यते तादृशविशिष्टार्थान्वितकर्तृत्वाभिधाने एव शात्विषयः। एवं च यक्लते पिनानुपपत्तिरि

१०वा० तिध्येये। ग्रामो याप्यते अर्थो बोध्यते इत्यादौ भावनाविशेष्यतया ग्रामादेर्भानेपि गमनादिकर्तुः। कर्म
त्वविवक्षया तस्यैवाख्यातार्थविशेष्यतया बोधः। सुलन्तस्यैते कर्तुश्च कर्मत्व इत्यनुशासनादतोञो
ग्रामोपाद्यते शिष्यमर्थो बोध्यते इत्यादयो न प्रयोगाः। ग्रामोपाद्यते अर्थो बोध्यते इत्यादौ कर्त्रे विषय
त्वादिरूपे च मुख्यभाक्तसाधारणं कर्मत्वमेवाख्यातार्थः। फलव्यापारयोः एकधात्वर्थतामते आ
श्रयत्वमेवाख्यातार्थः। धात्वर्थव्यापारविशेष्यतया तादृशाश्रयत्वविशेषणतया च धात्वर्थफल
स्य भानेऽल्पर्थ्यव्यापारस्य जन्यतासंबंधेनैव धात्वर्थक्रियायां नानाविधविशेषणत्वं पूर्ववदेव। अज्ञो रामः
ग्रामो पाद्यते इत्यादिकस्तु न प्रयोगः। द्वितीयया कर्मत्वबोधने धात्वर्थव्यापारविशेष्यतया॥

णार्थबोधसामग्र्याः प्रयोजकत्वात्॥ ग्रामादिसमभिव्याहृतस्थले च धात्वर्थविशेषणतयैव रूपर्थ
स्यबोधात्। एवं च धातोः सकर्मकत्वेन दुस्तरभावाख्यातस्य भावे चाकर्मकेभ्य इत्यनुशासनेनासा
धुत्वाच्च न तादृशप्रयोगः॥ ग्रामे पाच्यते इति भावाख्यातप्रयोगस्त्विष्ट एव। एवं च कर्मसमभि
माहारात्॥ एकदा कर्तृत्वकर्मत्वोभयबोधकताया आख्यातस्यानुसन्नतया ऽजाग्रामोयाप्य
ते इत्यादयो न प्रयोगाः॥ एवं तण्डुलः सहायेन पाच्यते चैत्रेणेत्यादौ धात्वर्थसहायादिकर्तृ
त्वस्य तद्विशेषणत्वस्यार्थव्यापारे चैत्रादिकर्तृत्वस्य तत्तीयान्तार्थस्य बोधः॥ शेषं पूर्ववदि
ति दिक्। ग्रामं गच्छतीतिवत् स्वर्गं गच्छतीति प्रयोगवारणाय परसमवेतत्वमपि द्वितीया

गु०वा०

धेऽस्यते। तस्य च यथात्वेर्थः स्वयः॥ परत्वे चैकदेशेपि आकांक्षावैचित्र्यात्॥ ग्रहस्वर्थस्वमतियोगित
याऽन्वयः॥ एवं चैत्रो ग्रामं गच्छतीति चैत्रः स्वारोग्रामभिन्नसमवेताग्रामनिष्ठसंयोगजनिका क्रियात
दाश्रयतावांश्चैत्र इत्यन्वयबोधः॥ स्वनिष्ठसंयोगजनकक्रियायां स्वभिन्नसमवेतत्वस्वया।
धात्स्वमात्मानं गच्छतीति न प्रयोगः॥ यत्र चोपयकमिथ्यो मल्लयोः संयोगस्तत्र मल्लोन्तरसम
वेतुक्रियायाः स्वनिष्ठसंयोगजनिकायाभिन्नसमवेतत्वेपि तादृशक्रियाश्रयतायाः स्वस्मि
न्वाधात् मल्लः स्वं गच्छतीति न प्रयोगः। न च स्वनिष्ठसंयोजनिकायाभिन्नसमवेतक्रि
यायाः स्वभिन्नसमवेतत्वेस्यायोग्यतयात दभावे प्रवाधितं स्वनिष्ठसंयोगजनकत्वविष

श्रमः

१८

175

यीत्वप्रकारकबोधसंभवात् । तदर्थमात्रतात्पर्येण स्वं गच्छतीत्यादिप्रयोगो दुर्वार एवेति वाच्यं ।। परस
मवेतत्वाविषयक । द्वितीयाधीन । फलजनकत्वबोधस्य । कुत्राप्यनभ्युपगमेन तादृशबोधे तदभा
सकलसामग्र्या । अप्यपेक्षणीयत्वात् । अथ स्वस्यापि द्वित्वावच्छिन्नस्वभेदवत्वात् स्वं गच्छती
तिप्रयोगस्य दुर्वारतया द्वितीयार्थफलस्य फलस्यवत्तावच्छेदकावच्छिन्नप्रतियोगिता
कत्वसंबंधेनैव भेदेन्वयो बोध्यः । तथा च चैत्रो ग्रामं गच्छति मैत्रो मल्लं गच्छतीत्यादिवाक्य
स्याप्रमाणत्वापत्तिः । चैत्रमल्लादिनिष्ठक्रियाया फलस्यवत्तावच्छेदकीभूतद्रव्यत्व[illegible]मल्ल
त्वाद्यवच्छिन्नभिन्नासमवेतत्वात् । तत्तत्कोक्तित्वानुपस्थितावपि शाब्दबोधोदयेन त

मु०वा०

घत्तितावच्छिन्नप्रतियोगितासंबंधेनान्वयोपगमासंभवात्।। उक्तयुक्त्या संबंधघटकोपस्थिते
रपि शाब्दबोधे ऽपेक्षितत्वात्।। एकधर्मावच्छिन्नप्रतियोगिताया असधर्मावच्छिन्नसंसर्गत्वे
मानाभावाच्च। प्रतियोगिविशेषिताभावबुद्धौ विशिष्टवैशिष्ट्यावगाहित्वनियमात्।। अन्व
यितावच्छेदकानवच्छिन्नप्रतियोगिताया संबंधतासंभवाच्चेति चेत्तर्हि क्रियान्वयिभे
दप्रतियोगितावच्छेदकत्वमेव द्वितीयार्थः। स्कंधे दण्डस्य संयोगस्याधेयतासंबंधेनान्वयप्र
तिनकापि दनुपपत्तिः।। नचैवमपि विहगो भूमिं न याति स्वर्गं विहगो विहगं न गच्छतीति प्रयो

एमः

गो दुर्वारः। विहगनिष्ठभूमिसंयोगजनकस्य विहगान्तरनिष्ठभेदप्रतियोगितावच्छेदक

१९

गमनस्य विहगे सत्वादिति वाच्यं। विहगो विहगं गच्छतीत्यादौ विहगादिवृत्तित्वविशिष्टसंयोग(
स्यजनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसंबंधेनान्वयोपगमात् विहग।
निष्ठक्रियायास्तद्विहगनिष्ठसंयोगजनकत्वेन तत् जनकत्वसंबंधेन तत्संयोगवत्वेपि विह
गवृत्तित्वविशिष्टतत्संयोगाश्रयतद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावान्नोक्तौ।
भयसंबंधेन विशिष्टसंयोगवत्वमित्यनतिप्रसंगात्॥ एवं सति परसमवेतत्वसंबंधघटकभे
दनतु द्वितीयार्थ इति चेन्न क्षतिः। विहगो विहगेन गम्यते इत्यादावपि जन्यत्वस्वावच्छिन्नत्वभे
दसामानाधिकरण्योभयसंबंधेन क्रियायाः संयोगेन्वय इष्यते। तत्र तत्क्रियावच्छिन्नत्वभे

वा०

एवंतिमूल्यादावेवतादृशभेदसामानाधिकरण्यसंबंधेनतत्क्रियाविशिष्टसंयोगादिमत्वोपगमा
त्।। तत्क्रियाश्रयविहगेतद्धुधेननातिप्रसंगइतिध्येयं।। ज्ञानादिरूपस्यविषयकव[illegible] स्वनिधा
यिधातुसमभिव्याहृततृतीयायाः प्राचीननवेनिरूपकतासंबंधेनधात्वर्थत्वपिविषयत्वम
र्थः।। तत्रप्रकृतमर्थस्याधेयतासंबंधेनान्वयः।। एतन्नियामकसंबंधस्याभावप्रतियोगितानवच्छे
दकतयाघटेज्ञानातिपठनेस्यादुवनुपपत्तेर्विषयित्वार्थकतामेवनवीनास्तत्रोपवर्णयंति।
तत्रचप्रकृतार्थस्यनिरूपितत्वसंबंधेनतस्यचधात्वर्थेआश्रयतासंबंधेनान्वयः।। घटादिति
ष्टज्ञानादिकर्मत्वेचज्ञानादिविषयत्वमेवविषयित्वादेश्चद्वितीयायालक्षणैवनतुशक्ति

ईमः

रितिसोमप्रत्यायिकाः। वस्तुतस्तु विषयितात्वस्य संयोगत्वाद्युपेक्षया आधेयतात्वाद्युपेक्ष
याकागुरुतया किंधर्मावच्छिन्ने शक्तिः कल्प्यते इत्यत्र विनिगमकं दुर्लभं। एकस्मिन्प्रयोगे भूय
स्त्वमप्यशक्यनिर्णयमिति तत्रापि शक्तिः सिध्यतीत्यवधेयं। चैत्रेण स्नापते घट इत्यादौ चक
र्मोख्यातेन ह्यपसैधात्वर्थनिरूपिते विषयत्वे बोध्यते। चाक्षुषत्वाद्यवच्छिन्नत्ववाचकद॥
ख्यादिवदसमर्पियाहृतद्वितीयायाश्च लौकिकविषयित्वं। तादृशकर्माख्यातस्य लौकि
कविषयत्वमर्थः उपनीतसौरभादिविषयकसुरभिचंदनमित्याकारकचाक्षुषादिदशा
यां सौरभं पश्यति सौरभं दृशति इत्याद्यप्रयोगात्। अथैवं पुष्पं जिघ्रतीति प्रयोगानुपपा

मु०वा०

सिं। प्राग्जप्रत्यक्षस्य पुष्पे गंधे लौकिकत्वविरहात्। तादृशधानुयोगेविषयितासामान्यस्यक
मेप्रत्ययार्थे लेगंधसाक्षात्कारेउपनयमर्यादया आकाशादिभाने आकाशेपि प्रतीतिप्रयोग
प्रसंगेनतत्रापि लौकिकविषयितायाआवश्यकत्वे प्रत्ययार्थतयोपगंतव्यत्वादितिचेन्ना
प्राधान्तोर्हि गंधलौकिकप्रत्यक्षत्वेशक्यतावच्छेदके। प्रागंधोपादानेह्यनुशासनात्।
।तत्समभिव्याहृतद्वितीयायाश्चाधेयत्वमेवार्थः। तस्य च पुष्पवृत्तित्वे चिन्वेऽगंधादिस्सधा
त्वर्थैकदेशेनापि समन्वयः। एवं च पुष्पेपि प्रतीमादितः पुष्पवृत्तिगंधलौकिकप्रत्यक्षा। १म:
श्रयतावानस्माकारकएवण्वबोधो न तु पुष्पान्तस्थितलौकिकविषयताशालिप्रत्य

२१

स्याश्रयस्याकारकत्वेतिनानुपपत्तिः। नचैवंसतिविषयतायांबोधकधातुसमभिव्याहृतकर्मत्व
यस्यविषयतार्थकत्वनियमभंगप्रसंगइतिवाच्यं। विषयतानवच्छिन्नतादृशावस्त्वभिधायकधातु
समभिव्याहृतकर्मप्रत्ययस्यैवतदर्थकत्वनियमात्।। अस्यचगंधात्मकविषयतावच्छिन्नप्रत्य
क्षवाचकतयातादृशस्यनियमस्याबाधितत्वात्।। नचघ्रातुसमभिव्याहृतद्वितीयायागं
धान्विताधेयत्वार्थकत्वेआमोदमुपजिघ्रतीत्यादेरनुपपत्तिः। गंधविशेषरूपामोदवृ
त्याधेयत्वस्यगंधेबाधादितिवाच्यं। विषयतावच्छिन्नप्रत्यक्षार्थकघ्राधातुसमभिव्याहृत
द्वितीयायाएवाधेयतार्थकत्वनियमात्।। नत्रचविषयतानवच्छिन्नस्यैवप्रत्यक्षविशेषस्य

मु० वा० वयत्वस्य विशेषस्यैव लक्षणया धात्वर्थत्वोपगमेन विषयिताया एव तदर्थत्वात्॥ वस्तुतस्तु पुष्पं
ऽः सुरभीत्यादौ आधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतैव द्वितीयार्थः॥ न [illegible] स्याश्रयगं
धनिरूपितलौकिकविषयिताशालिप्रत्यक्षात्मकधात्वर्थैकदेशे विषयितायां निरूपितत्वसंबं
धेनान्वयः॥ तेनेदानीं न पुष्पे गंधः इत्यादिप्रत्ययस्याधेयतयासंसर्गेण कालादिप्रकारक
[illegible]त्वे [illegible] पिता दृशप्रत्ययदशायां कालेऽपि प्रतीत्यादिको न प्रयोगः तादृ
शाद्वितीयगंधादिविषयताया कालादिप्रकारतानिरूपितत्वविरहात्॥ अत एव तदानीं प्र राम:
त्युपस्थितौ घ्राणेन हस्तुमासायनत्तस्मिमायधोरस्यादावा प्रातपि वा नु गंधवद्दुः सुगंधि॥

२२

रिक्तादेशे चोपाधिनिष्ठगंधग्रहणात्स्येघ्राणेवजिघ्रतेः प्रयोगात् तादृशगंधेवाननगंधवद्धादिष्वत
निस्पवाधेपिमस्तिः। तादृशगंधस्याननापुवृत्तित्वेपिज्ञानेनगंधस्साकारकबोधीयगंधविष
यताख्यज्ञानतादिप्रकारतानिरूपितत्वेनवाक्यार्थाबाधात्॥ वाघ्राणीतत्वेपकगंधस्यपत्रेवा
घ्रादिवृत्तित्वेनैवग्रहणात्र चैपकेजिघ्रतीतिप्रयोगस्स्यान्नेष्यते॥ एवं च यत्सुआधेयत्वमात्रेबुद्धि।
तीयार्थः। ननु सम्पवायाववच्छिन्नत्वविशेषितमाधेयत्वं। तथा च मुखादिसंसक्तस्तिकादि
गंधेपरंपरासंबंधेन मुखादिवृत्तित्वस्य सत्वान्नोक्तस्थलेऽनुपपत्तिरिति। तदसत्। तथास
ति कालेजिघ्रतीतिप्रयोगापत्तेः। पुष्पमाघ्रापतेरस्योरेऽवनिरुक्तप्रकारत्वमाख्यातार्थः। आ।

मु०वा०

अयत्नासंबंधेनपुष्पाद्यन्वितेतस्मिन्धात्वर्थे प्रसक्तस्य निरूपितत्वसंबंधेन तद्विशेषणतासं
पन्नगंधविषयितायाश्चैतादृशसंबंधेनान्वयः। एकविशेषणतयोपस्थितस्यस्वातंत्र्येणा
न्यविशेषणतयान्वयकुद्दूरेवाभ्युपगतत्वात्॥ अत्रचप्रसक्षपारतंत्र्येऽस्तौगंधविषयिता
याआख्यातार्थेअन्वयोपगमेनमुख्यत्वविरोधविरहात्॥ अस्तुवागंधोलौकिकविषयता
प्रसक्षंचविशकलितमेवधातोरर्थः। कर्माख्यातादिसमभिव्याहारेगंधविषयतायाः
प्रसक्षविशेषणता। कर्माख्यातसमभिव्याहारस्थलेचप्रसक्षविशेष्यतेतेनकश्चि
द्द्रव्यंनजिघ्रतीत्यत्रगंधविषयितानिरूपितप्रकारितानिरूपकत्वमेवपुष्पादिनिष्ठंचि

एम.

प्रतिकर्मत्वमितिरिक्तं। अथ दृश्यपदे समभिव्याहृत द्वितीयापालौकिकविषयितार्थत्वे। सौरभं न पश्यतीत्यादौ सौरभादिनिरूपितलौकिकविषयिताशालिचाक्षुषाद्यप्रसिध्या आकाशं न पश्यतीत्यादौ आकाशादिनिरूपितलौकिकविषयिताया एवाप्रसिद्ध्या तादृशविषयिताशालिचाक्षुषाश्रयत्वाभावरूपवाक्यार्थाप्रसिद्धेः। न च सौरभं न पश्यतीत्यादौ सौरभादिनिरूपितलौकिकविषयित्वाभावश्चाक्षुषादौ प्रतीयत इति वाच्यं। एवं सत्सुगन्धाकाशेन पश्यतीत्यादावप्रतीकारात्। न च लौकिकविषयितायां निरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकाकाशाद्यभावः प्रतीयत इति वाच्यं। वस्तुनि

वृ॰ वा॰

ष्यामकसंबंधस्यसंसर्गाभावप्रतियोगितावानवच्छेदकत्वपात्तादृशाभावस्याप्रसिद्धेः।ए।
तेननिरूपकतासंबंधेनचाक्षुषादिनिष्ठलौकिकविषयिताया अभावस्तत्राकाशादौप्रतीय
तइतिनिरस्तं। अन्वयबोधस्यप्रथमेजातेमुख्यविशेष्यकतायाः सर्वानुभवसिद्धत्वात्भंगप्र
संगाच्च। चाक्षुषादिलौकिकविषयितात्वावच्छिन्नस्यपदार्थस्यानुपस्थितेस्तदभावप
स्याकाशादेर्भानासंभवाच्च॥ भावान्वयबोधेचलौकिकविषयितामकारेणचाक्षुषादे
र्भानाच्चाक्षुषप्रकारेणचाक्षुषादेर्भानान्नचाक्षुषप्रकारेणतस्यभानं॥ भवतुवाकस्य
निपामकोपिसंबंधोऽभावप्रतियोगितावच्छेदकस्तथापिनिरूपितत्वसंबंधावच्छि

एम;

१०

187

त्वप्रतियोगिताकस्य विषयिताविशेषनिष्ठाकाशत्वाद्यभावस्य भानोपगमेन संभवति। तथा
सति आकाशं पश्यति चैत्र इत्याकारकभ्रमदशायां आकाशं न पश्यति चैत्र इत्यादिवाक्याद्बु
द्धबोधप्रसंगात्॥ आकाशं पश्यति मैत्र इत्यादिभ्रमदशायां आकाशं न पश्यति चैत्र इत्या॥
दिवाक्याद्बुद्धबोधोपपत्तेर्दुरुपपन्नत्वं च यालौकिकविषयितात्वसामानाधिकरण्येनै
व तादृशाभावबोधकं तद्वाक्यमुपगतमेतादृशबोधश्च लौकिकविषयितात्वसामाना
धिकरण्यमात्रेणैवाकाशादिनिरूपितत्वाभावावगाही दर्शितायोग्यताज्ञानाप्रतिबध्य
एवेति। न च चैत्रीयचाक्षुषादिनिरूपितलौकिकविषयितात्वावच्छेदेनैव तादृशाभावो

दर्शितवाक्येन प्रसाध्यते इति चैत्रीयचाक्षुषादिनिरूपितलौकिकविषयितायां। आकाशीयत्वावगा
हि चैत्र आकाशं पश्यतीत्यादिवाक्यजन्यज्ञाने। तादृशवाक्यजधियं प्रति व भातीति वाच्यं। ताद
शविषयितात्वेन विषयितानुपस्थितेस्तदवच्छेदेनाभावप्रत्ययतासंभवात्।। चैत्र आकाशं
पश्यतीत्यादिवाक्यजन्यबोधे चैत्रांशे दर्शनाश्रयत्वं विशेषणं दर्शनांशे लौकिकविषयितावि
शेषणमिति रीत्यैव पदार्थानां भानात्।। चैत्रीयचाक्षुषविषयितात्वेनाकाशधर्मितावच्छे
दकं किंतु चाक्षुषलौकिकविषयितात्वमेवेति तच्चाक्षुषलौकिकविषयितात्वावच्छेदेनाकाशा॥ इप:
द्यभावावगाहिज्ञाने प्रत्येव प्रतिबंधकतया निरुक्तधर्म्यंशावच्छेदेनाकाशाद्यभावावगाहि

3849

२५

[OrderDescription]
,CREATED=01.07.20 15:31
,TRANSFERRED=2020/07/01 at 16:06:42
,PAGES=189
,TYPE=STD
,NAME=S0003244
,Book Name=M-1786-VYUTAPTIVAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,